दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णतृतीया
भाद्रपद 15 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-10 ■ वर्ष-5 ■ अङ्क-312 | 1 | अगस्त 31, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 राष्ट्रपतिः द्रौपदी मुर्मु अद्य राष्ट्रीय-फैशन-प्रौद्योगिकी-संस्थानस्य (NIFT) संयुक्ते दीक्षान्त-समारोहे २०२६ भागं ग्रहीष्यति

4 संस्कारभारती-पालमपुरद्वारा कला-साहित्ययोः उत्कृष्टयोगदानाय ‘कलागुरुसम्मानेन’ सम्मानिताः

9 रक्षाबन्धनपर्वणः ऐतिहासिकमहत्त्वम् (पर्वविशेषः)- डॉ विमलेश झा, गंगौली, सरिसबपाही, मधुबनी बिहार

## भारत-उज्बेकिस्तानयोः मध्ये खनन-आयुर्वेद-पर्यटन-रणनीतिक-सहभागितां समेत्य बहुषु क्षेत्रेषु सन्धि-पत्राणि हस्ताक्षरङ्कतान्



भारत-उज्बेकिस्तान-देशाभ्यां खनन-आयुर्वेद-पर्यटनार्थिकसहयोग-पर्यावरण-उच्चशिक्षादिक्षेत्रेषु परस्पर सहयोग-संवर्धनाय सन्धिपत्राणि हस्ताक्षरितानि । देशद्वयेन त्रिंशदुत्तरविद्रसहस्त्रवर्ष यावत् पञ्चार्बुद-डालरमितं व्यापारलक्ष्यं निर्धारितम्। यत् हि साम्प्रतिक व्यापारास्य पञ्चगुणितं वर्तते। प्रधानमंत्री नरेन्द्रमोदी उज्बेकिस्तानस्य सर्वोच्य सम्मानम् अपि अलभत । इदं सम्मानं देशद्वयस्य मध्ये सहयोग- संवर्धने तदीय-योगदानाय उपायनीकृतम्।

ताशकंद-नगरे उज्बेकिस्तानस्य राष्ट्रपतिः शावकत मिर्जियोयेवः प्रधानमन्त्रिणे नरेन्द्र-मोदिने सर्वोच्च राजकीय-सम्मानेन ऑर्डर ऑफ ओलिय दरजाली दोस्तलिक इत्यनेन सम्मानितवान्। प्रधानमंत्रिणा एषः सम्मानः भारत-उज्बेकिस्तानयोः दृढसम्बन्धेभ्यः समर्पितः ।

उज्बेकिस्तानस्य सर्वोच्च-राजकीय-सम्मानं प्राप्य गौरवमनुभवामि-प्रधानमन्त्री ।श्रीमोदी अवोचत् यत् सम्मानं प्राप्य असौ गौरवमनुभवति। अपि च देशद्वयं व्यापक-रणनीतिक-संरचनायाः अंतर्गतं निर्णायक-लक्ष्य निर्धारणार्थम् अग्रे समेधयिष्यन्ते। राष्ट्रपतिना शावकत मिर्जियोयेफ इत्यनेन सह प्रतिनिधिमंडल-स्तर-वार्तायां श्रीमोदी अवोचत् यत् देशद्वयं निजसम्बन्धान् व्यापक-रणनीतिकसहभागितास्तरं यावत् नयतः । अनन्तरं सहयोगस्य समस्तस्तराणां समीक्षायै विदेशमंत्रिणां समन्वयसमितेः घटना विधास्यते

श्रीमोदी अवदत् यत् अस्मिन् वर्षे वन्दे मातरम् इति गीतस्य सार्ध-शततमी जयन्ती वर्तते, अतः इदं वर्षम् इतोऽप्यधिकं विशिष्टं महत्त्वमावहति ।

## मन-की-बात इत्याख्ये कार्यक्रमे प्रधानमन्त्रिणा मोदिना पीएम-स्वनिधि-योजनया महिला-सशक्तीकरणं प्रतिपादितम्, उक्तञ्च पञ्चत्रिंशल्लक्षाधिकाः महिलाः अनया लाभान्विताः

प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत् विकसित-भारताय मादकमुक्त-युवाभियानं कृत्स्ने हि देशे द्रुतगत्या अग्रे संवर्धते। मन-की-बात इत्याख्ये कार्यक्रमे स्व-विचारान् उपस्थापयन् श्रीमोदी सन्तोषं प्राकटयत् यत् व्यसन-मुक्त-युवकानां मादकमुक्त-भारतस्य च लक्ष्य-युक्तम् इदम् अभियानं केवलम् औपचारिकं नास्ति, अपि तु बहवः जनाः विशेषतः युवानः महत्या संख्यया अस्मिन् संयुज्यन्ते। प्रधानमन्त्री न्यवेदयत् यत् मादक द्रव्य-व्यसनं केवलम् एकं जनं न ग्रसते, अपि तु समग्रः परिवारः समाजश्च अस्य दुष्परिणामान् भुङ्क्ते । सः तेषां सर्वेषां भूरिशः प्रशंसां कृतवान् ये मादक-विरोधि-जागरूकतां प्रसारयन्ति अथ च मादकद्रव्येन पीडितानां साहायतायै अग्रे आगच्छन्ति ।

प्रधानमन्त्रिणा मिशन शक्ति-सैट् इत्याख्यः उपक्रमः प्रतिपादितः, अष्टोत्तरशतदेशानां द्वादशसहस्रं छात्राः उपग्रह-प्रौद्योगिकीं ज्ञास्यन्ति, नूतनोन्मेषं च साधयिष्यन्ति ।

प्रधानमन्त्री अवदत् यत् पीएम-स्वनिधि-योजना-माध्यमेन लक्षशः महिलाः नूतनं सामर्थ्यं प्राप्नुवन्ति । सः अकथयत् यत् महिला सशक्तिकरणस्य अस्मिन् उपक्रमे यावती चर्चा भवेत् तावती न दृश्यते। श्रीमोदिना स्पष्टीकृतं यत् पीएम-स्वनिधि-योजनायाः लाभार्थिषु प्रायः षट्चत्वारिंशत् प्रतिशतन्मिताः महिलाः सन्ति ।




प्रधानमन्त्री प्रोक्तवान् यत् स्वच्छतायां बहवो गुणाः भवन्ति । सः अवदत् यत् यदा कस्यचित् स्थानस्य स्वच्छता सङ्कल्पः जनसामान्यस्य स्वकीय-सङ्कल्पः भवति, तदा सः तस्य स्थानस्य समग्र स्वरूपम् एव परिवर्तयति । श्रीमोदी अवदत् यत् अद्य देशस्य कन्यानां स्वप्नाः भूमेः आरभ्य अन्तरिक्षं यावत् विस्तीर्णाः। सः असूचयत् यत् भारतं समग्र विश्वस्मात् सहस्रशः कन्याः एकत्र आनयति याः एतादृशान् स्वप्नान् पश्यन्ति । प्रधानमन्त्रिणा प्रतिपादितं यत् अस्य उपक्रमस्य नाम मिशन शक्ति-सैट' इत्यस्ति, येन अष्टोत्तरशत-देशानां द्वादश-सहस्रं छात्राः नूतनोन्मेष-क्षेत्रे उपग्रह-प्रौद्योगिकीं ज्ञातुम् अवसरं प्राप्नुवन्ति । प्रधानमन्त्री मुम्बई-नगरस्थेन कृष्ण-शेषाद्रि इत्यमुना सह सम्भाषणम् अकरोत्, येन www.bharatrajya.com इति एकं विशिष्टं वेबफलकं निर्मितम् । अनेन वेबफलकेन कस्यापि वर्षस्य चयनेन जनाः सहजतया ज्ञातुं शक्नुवन्ति यत् तस्मिन् काले भारतस्य कस्मिन् भागे कस्य शासकस्य शासनम् आसीत्।

## अद्यतनीयं सुभाषितम्

**भीतेभ्यश्चाभयं देयं,व्याधितेभ्यस्तथौषधम्।**
**देया विद्यार्थिनां विद्या,देयमन्नं क्षुधातुरे।।**

भयभीत व्यक्ति को भय की स्थिति से बचा कर भयमुक्त करना चाहिए तथा व्याधिग्रस्त (रोगी) व्यक्ति को औषधि प्रदान कर उसकी सहायता करनी चाहिए। इसी प्रकार विद्यार्थियों को विद्या का दान तथा भूख से व्याकुल व्यक्तियों को अन्न का दान करना चाहिए।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## नेपाल-देशे भीष्म-जलाप्लावेन मृतानां संख्या अष्टषष्ट्यधिक-सप्तशतं सम्प्राप्ता,

नेपाल-देशे भीष्म-जलाप्लावेन मृतानां संख्या अष्टषष्ट्यधिक-सप्तशतं सम्प्राप्ता, प्रायः पञ्चविंशतिशतं जनाः अद्यापि विलुप्ताः, भारतेन एकादश-टन-मितां मानवीय-सहायता-सामग्रीम् आदाय चतुर्थं विमानं नेपालाय प्रेषितम् ।

मध्यनेपाले आकस्मिकजलप्रलयेन मृतानां संख्या समेध्य अष्टषष्ट्युत्तर-सप्तशतं संवृत्ता। अद्यापि मृतवपुंसि सम्प्राप्यन्ते। अस्यां घटनायां सार्धद्विसहस्रजनाः विलुप्ताः सन्ति। संकटस्य पञ्चमे दिने साहाय्योद्धारकर्मचारिणः द्रुतगत्या विलुप्तानाम् अन्वेषणाय कार्यं कुर्वन्ति, अष्टसु अपि प्रभावितजनपदेषु शवः प्राप्ताः । नेपालस्य नेशनल डिजास्टर रिस्क रिडक्शन एंड मैनेजमेंट अथॉरिटी (NDRRMA) इत्यनेन उक्तं यत् इदानीं यावत् षडाशीत्युत्तरैकशताधिकाष्टसहस्रजनाः सुरक्षापूर्वकं निष्कासिताः। एतेषु सप्तविंशत्यधिकद्विशतं वैदेशिकनागरिकाः वर्तन्ते । विदेशमंत्रालयेन उक्तं यत् पादोनत्रिशतं भारतीयनागरिकाः विलुप्ताः सूच्यन्ते । भारतं साहाय्योद्धारकार्येषु अनवरतं साहाय्यं विदधाति । एकादश टन भारमिता साहाय्य-सामग्रीं नीत्वा चतुर्थं विमानं काठमांडूनगरं प्राप्तम्।

# राष्ट्रपतिः द्रौपदी मुर्मु अद्य राष्ट्रीय-फैशन-प्रौद्योगिकी-संस्थानस्य (NIFT) संयुक्ते

## दीक्षान्त-समारोहे २०२६ भागं ग्रहीष्यति



राष्ट्रपतिः द्रौपदी मुर्मु अद्य नवदेहल्यां राष्ट्रीय-फैशन-प्रौद्योगिकी-संस्थानस्य (NIFT) संयुक्ते दीक्षान्त-समारोहे २०२६ भागं ग्रहीष्यति। देशे सर्वत्र स्थितानां निफ्ट-संस्थानस्य अष्टादश (१८) परिसराणां स्नातकाः छात्राः स्व-उपाधिं प्राप्तुं स्वकीय-शैक्षणिक-यात्रायाः सम्पूर्तौ च एकत्र सम्मिलिताः भविष्यन्ति। केन्द्रीय-वस्त्र-मन्त्री गिरिराजसिंहः अपि अस्मिन् अवसरे उपस्थितः भविष्यति। वस्त्र-मन्त्रालयस्य अधीने १९८६ तमे वर्षे स्थापितं निफ्ट इति एकं वैधानिकं संस्थानम् अस्ति। वर्षेभ्यः इदं फैशन-शिक्षायाः कृते एकम् अग्रणी-संस्थानरूपेण उद्गतम् अस्ति, यत् पारम्परिक-कला-शिल्पं, शैक्षणिक-ज्ञानं, रचना-नवोन्मेषं (Design Innovation), प्रौद्योगिकीं, सर्जनात्मक-चिन्तनम्, उद्योगेन सह सम्बद्धतां च एकत्र संयोजयति।

# राज्यमन्त्री डॉ. जितेन्द्रसिंहः सशस्त्र-बल-मुख्यालय-सङ्घेन सह मेलनं कृतवान्



कार्मिक-लोकशिकायत-निवृत्तिवेतन-राज्यमन्त्री (पेंशन-राज्यमन्त्री) डॉ. जितेन्द्रसिंहः सशस्त्र-बल-मुख्यालय-सङ्घस्य प्रतिनिधिमण्डलेन सह उपवेशनं कृतवान्। अस्मिन् अवसरे कर्मचारिणां विविधानां याचनानां सेवा-सम्बद्धानां विषयाणां च विषये विचार-विमर्शः जातः। प्रतिनिधिमण्डलेन पदोन्नतिः, आजीविका-संवर्धनं (करियर-प्रगतिः), सेवा-सम्बद्धाः लम्बित-प्रकरणाः च इत्यादिसम्बद्धं ज्ञापनं श्रीसिंहाय समर्पितम्। श्रीसिंहः आश्वासनं दत्तवान् यत् सम्बद्ध-विभागानां याचनानां विषये विचारः करिष्यते। सः अवदत् यत् सङ्घेन उत्थापितेषु विषयेषु समुचितं ध्यानं प्रदास्यते।

# आईजीएमसी-शिमलायां स्वाइन- फ्लू- संक्रमणेन ६४

## वर्षीयस्य जनस्य मृत्युः, अगस्तमासस्य १३ दिनाङ्के आसीत् प्रवेशितः

हिमसंस्कृतवार्ताः- शिमला।
इन्दिरागान्धी- वैद्यकीय-महाविद्यालये, चिकित्सालये (आईजीएमसी) शिमलायां स्वाइन-फ्लू- रोगेण पीड़ितस्य ६४ वर्षीयस्य जनस्य चिकित्साकाले मृत्युः अभवत्। मृतकः बिलासपुर-मण्डलस्य निवासी आसीत्। सः २०२६ तमस्य वर्षस्य अगस्तमासस्य १३ दिनाङ्के चिकित्सायै आईजीएमसी-चिकित्सालये प्रवेशितः आसीत्। चिकित्सालये उपचारकाले अगस्तमासस्य २९ दिनाङ्के रुग्णस्य स्वाइन-फ्लू-परीक्षणस्य प्रतिवेदनं सकारात्मकं (पॉजिटिव) प्राप्तम्। तदनन्तरं वैद्यानां निरीक्षणे तस्य उपचारः प्रचलति स्म, परन्तु तस्य स्वास्थ्ये परिष्कारः न जातः। चिकित्साकाले एव रुग्णः प्राणान् अत्यजत्। स्वाइन-फ्लू-रोगस्य पुष्टेः अनन्तरं चिकित्सालय-प्रशासनेन आवश्यकाः सावधानाः उपायाः कृताः। एतस्य प्रकरणस्य अनन्तरं स्वास्थ्यविभागः अपि स्थितेः उपरि दृष्टिं स्थापयति।
स्वाइन-फ्लू-रोगस्य लक्षणानि-
स्वाइन-फ्लू (H1N1) रोगस्य लक्षणानि सामान्य- फ्लू-सदृशानि भवितुं शक्नुवन्ति। प्रमुखलक्षणानि अधोनिर्दिष्टानि सन्ति-

**> अकस्मात् तीव्रज्वरः**
**> कासः, विशेषतः शुष्ककासः**
**> कण्ठवेदना (कण्ठखराशः)**
**> नासिकास्रावः अथवा नासिकावरोधः > शिरोवेदना**



> मांसपेशीनां शरीरस्य च वेदना
> शीतकंपः
> अत्यधिकः श्रान्तिः (क्लमो) दौर्बल्यं च
> केषुचित् सन्दर्भेषु उत्क्लेदः (वमनभावः), वमनम्, अतिसारः वा, विशेषतः बालकेषु
गम्भीरलक्षणेषु सति सावधानता-
श्वासग्रहणे कष्टम्, वक्षसि वेदना, निरन्तरं तीव्रज्वरः, अत्यधिकं दौर्बल्यम्, भ्रमः अथवा मूर्छा सदृशेषु लक्षणेषु दृश्यमानेषु सत्सु त्वरितमेव चिकित्सकेन सह सम्पर्कः करणीयः।

# HP MONSOON UPDATE- गतिशीला वर्षर्तुः शिमलायां

## धारासारवृष्टिः, सितम्बरमासस्य तृतीयदिनाङ्कं यावत् प्रवर्तिष्यते वृष्टिक्रमः

हिमसंस्कृतवार्ताः- शिमला।
हिमाचलप्रदेशे वर्षर्तुः (मानसून) अधुनापि सक्रियः वर्तते। ऋतुविज्ञानविभागस्य अगस्तमासस्य ३० दिनाङ्कस्य वार्तापत्रिकानुसारम् अग्रिमेषु कतिपयदिनेषु प्रदेशस्य बहुषु भागेषु मन्दतः मध्यमां यावत् वृष्टिक्रमः अनुवर्तितुं सम्भाव्यते। अगस्तमासस्य ३१ दिनाङ्के, सितम्बरमासस्य प्रथमे, द्वितीये, तृतीये च दिनाङ्के पृथक्-पृथक् स्थानेषु अतिवृष्टिः भवितुं शक्नोति। तत्रैव, रविवासरे अपराह्ने चतुर्वादनानन्तरं राजधान्यां शिमलायां धारासारवृष्टिः अभवत्। अपरञ्च कुहेलिकया पर्वताः आच्छादिताः। ऋतुविज्ञानविभागेन ज्ञापितं यत् अगस्तमासस्य ३१ दिनाङ्कतः सितम्बरमासस्य ३ दिनाङ्कं यावत् किन्नौर-लाहौल-स्पीति-मण्डलयोः प्रतिघण्टां ३० तः ४० किलोमीटर-वेगेन तीव्रवायोः चलनस्य सम्भावना वर्तते। तत्रैव अगस्तमासस्य ३० दिनाङ्कतः सितम्बरमासस्य ५ दिनाङ्कं यावत् समतल/ निम्न-मध्यपर्वतीयक्षेत्रेषु पृथक्-पृथक् स्थानेषु मेघगर्जनं, विद्युत्पातः तथा प्रतिघण्टां ३०- ४० किलोमीटरवेगेन तीव्रवायवः चलितुं शक्नुवन्ति।

### एतेषु मण्डलेषु अतिवृष्टेः सम्भावना-

मण्डलस्तरीय-पूर्वानुमानमनुसृत्य बिलासपुरमण्डले सितम्बरमासस्य १ तथा २ दिनाङ्के एक-द्वयोः स्थानयोः अतिवृष्टेः सम्भावना अस्ति। चम्बामण्डले १ सितम्बर-दिनाङ्के, तथा च काङ्गड़ामण्डले ३१ अगस्ततः ३ सितम्बरदिनाङ्कं यावत् विभिन्नदिनेषु एक-द्वयोः स्थानयोः अतिवृष्टेः सम्भावना व्यक्ता कृता। मण्डीमण्डले ३१ अगस्त-दिनाङ्के मध्यमतः अतिवृष्टिः तथा १ सितम्बरदिनाङ्के अतिवृष्टेः सम्भावना वर्तते। शिमलामण्डले १ सितम्बरदिनाङ्के एक-द्वयोः स्थानयोः मध्यमतः अतिवृष्टिः भवितुं शक्नोति। सोलनमण्डले १ सितम्बरदिनाङ्के मध्यमतः भ्अति तथा २ सितम्बरदिनाङ्के अतिवृष्टेः सम्भावना वर्तते।



सिरमौरमण्डले ३१ अगस्ततः ३ सितम्बरदिनाङ्कं यावत् पृथक् पृथक् स्थानेषु अतिवृष्टेः पूर्वानुमानमस्ति।
वृष्टौ सावधानाः भवन्तु-
ऋतुविज्ञानविभागेन संवेदनशीलक्षेत्रेषु भूस्खलनस्य पङ्कस्खलनस्य च आशङ्का व्यक्ता कृता। अतिवृष्टेः समये केषुचित् जलसंसाधनेषु जलस्तरः प्रवाहश्च वर्धितुं शक्नोति, यदा तु निम्नक्षेत्रेषु जलभरावस्य स्थितिः उत्पन्ना भवितुं शक्नोति। पिच्छिलमार्गाणां न्यूनदृश्यतायाः च कारणेन वाहनचालकाः अपि सावधानाः भवेयुः इति परामर्शः दत्तः। जनेभ्यः भूस्खलन- आकस्मिकजलप्लावन (बाढ़)- पङ्कस्खलनाशङ्कायुक्तेभ्यः क्षेत्रेभ्यः गन्तुं वारयितुं तथा च नदी- उपनदी- अन्यजलाशयेभ्यः सुरक्षितां दूरीं स्थापयितुं परामर्शः प्रदत्तः अस्ति।

# वैद्यकीय-महाविद्यालयेषु ५०० कोटि-मूल्यस्य यन्त्राणि, ३०० वैद्यकीय- अधिकारिणः, ३५० विशेषज्ञवैद्याः नियुक्ताः भविष्यन्ति- मुख्यमंत्री सुक्खुः



हिमसंस्कृतवार्ताः- शिमला।
मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारः प्रदेशस्य सर्वेषु वैद्यकीय- महाविद्यालयेषु अत्याधुनिक- निदानसेवानाम् उपलब्धिं कारयितुं कार्यं कुर्वन् अस्ति। एतेषु वैद्यकीय- महाविद्यालयेषु प्रायः ५०० कोटि- रूप्यकाणां व्ययेन अत्याधुनिक-यन्त्राणि स्थाप्यन्ते। एतादृशानि यन्त्राणि अधुना केवलं देहल्याः 'एम्स' (AIIMS) चिकित्सालये एव उपलब्धानि सन्ति। बिलासपुरस्य एम्स चिकित्सालये, लुधियाना- जालन्धर- सदृशेषु अपि एतादृश्यः सुविधाः सम्प्रति उपलब्धाः न सन्ति। नादौन-विधानसभाक्षेत्रस्य कांगूग्रामे जनस्वास्थ्य-शिबिरस्य शुभारम्भावसरे मुख्यमन्त्री अवदत् यत् प्रदेशस्य वैद्यकीय- महाविद्यालयेषु आधुनिक-प्रौद्योगिक्याः यन्त्राणां आगमनेन निदानसेवाः सुदृढाः सतीकाः च भविष्यन्ति, जनेभ्यः त्वरितं सम्यक्-उपचारः च लप्स्यते।मुख्यमन्त्री प्रावोचत् यत् वैद्यकीय- महाविद्यालयेभ्यः अतिरिच्य राज्यसर्वकारः सर्वेषु ७० आदर्शचिकित्सासंस्थानेषु अपि विशेषज्ञवैद्यानां नियुक्तिं कुर्वन् अस्ति, येन जनाः गृहसमीपे एव उत्तमं चिकित्सोपचारं प्राप्तुं शक्नुयुः। सः अकथयत् यत् सर्वकारः ३०० वैद्यकीय- अधिकारिभ्यः अतिरिच्य २०० विशेषज्ञवैद्यानां, १५० अति- विशेषज्ञवैद्यानां नियुक्तिं कर्तुं गच्छति। अस्मिन्नेव क्रमे नादौन, काङ्गम, गलोड़ तथा धनेटा इत्येतेषां चिकित्सालयेषु अपि वैद्यानां नियुक्तिः कृता अस्ति।
मुख्यमन्त्री सुक्खुः अवदत् यत् जोल-सप्पड़-स्थाने 'डॉ. राधाकृष्णन- राजकीय- आयुर्विज्ञान- महाविद्यालयस्य' शीघ्रमेव शुभारम्भः भविष्यति। अत्र उत्तरभारतस्य प्रथमं सम्बद्ध- स्वास्थ्य- सेवा- संस्थानम् उद्घाटयिष्यते। अस्मिन् संस्थाने अस्मिन्नेव वर्षे प्रवेशप्रक्रियायाः शुभारम्भाय उपकुलपतये मार्गनिर्देशाः प्रदत्ताः। अधुना सम्बद्ध- स्वास्थ्य- सेवाभिः सम्बद्धाः व्यावसायिकाः हमीरपुरे एव सज्जीकरिष्यन्ते। क्षेत्रवासिभ्यः जनस्वास्थ्य- शिबिरस्य पूर्णलाभं स्वीकर्तुं आह्वानं कुर्वन् मुख्यमन्त्री अवदत् यत् आगामीकाले नादौन- हमीरपुरयोः अन्यक्षेत्रेषु अपि एतादृशानि शिबिराणि आयोजयिष्यन्ते।
सः अकथयत् यत् कांगूग्रामस्य वरिष्ठ- माध्यमिक- विद्यालयाय 'राजीव गान्धी डे बोर्डिङ्ग विद्यालयस्य' पदवी प्रदत्ता। अत्र नूतनभवनस्य निर्माणं भविष्यति, बालकेभ्यः अत्याधुनिक-शिक्षणसुविधाः प्रदास्यन्ते। प्राथमिकविद्यालयस्य भवननिर्माणकार्यम् अपि शीघ्रमेव प्रारप्स्यते। मुख्यमन्त्री अवदत् यत् आह्वानपूर्णानाम् आर्थिकपरिस्थितीनां सत्त्वेऽपि अद्य हिमाचलप्रदेशः आत्मनिर्भरतां प्रति अग्रेसरः अस्ति, स्वास्थ्य- शिक्षा- सहितेषु सर्वेषु मुख्यक्षेत्रेषु च धनस्य काऽपि न्यूनता न स्थाप्यते। अस्य पूर्वं कांगू-प्राप्तौ मुख्यमन्त्रिणः भव्यं स्वागतं कृतम्।

# उज़्बेकिस्तान-देशात् लप्स्यते यूरेनियम-खनिजम्; प्रवर्तिष्यते भारतस्य UPI-तन्त्रम्, प्रधानमन्त्रिणः यात्रायां जाताः ११ ऐतिहासिकाः सन्धयः

भारत-उज़्बेकिस्तान-देशाभ्यां स्वसम्बन्धान् नूतनोन्नतिं नयद्भ्यां रविवासरे 'व्यापक-सामरिक-सहभागिता' (Comprehensive Strategic Partnership) रूपेण परिवर्तयितुं निर्णयः कृतः। अस्याः अन्तर्गतं भारतस्य परमाणु-ऊर्जा-आवश्यकतानां पूर्तये दीर्घकालपर्यन्तं यूरेनियम-खनिजस्य आपूर्तिं सुदृढीकर्तुं सहमतिः संजाता। अनेन सहैव रक्षा-व्यापार- गिफ्टनगरी-सदृशानाम् आधुनिक-नगरविकास- प्रतिमानानां क्षेत्रेषु सहयोगः संवर्धिष्यते। प्रधानमन्त्रिणः नरेन्द्रमोदिनः तथा उज़्बेकिस्तानस्य राष्ट्रपतेः शौकत- मिर्जियोयेवस्य मध्ये रविवासरे संजातायाः वार्तायाः अनन्तरं द्वाभ्यां देशाभ्याम् एकादश (११) सन्धिषु सामंजस्यपत्रेषु (MoU) च हस्ताक्षराणि कृतानि, पञ्च प्रमुखघोषणायुक्तयः च प्रकटीकृताः। द्वाभ्यां देशाभ्यां २०३० वर्षपर्यन्तं द्विपक्षीयव्यापारं पञ्च-अर्बुद (५ बिलियन)-डालर्-मूल्यं यावत् प्रापयितुं लक्ष्यं



निर्धारितम्। तथा च ऊर्जा-सामरिकखनिजयोः क्षेत्रे दीर्घकालीनसहयोगं सुदृढीकर्तुं महत्त्वपूर्णनिर्णयाः स्वीकृताः। भारत-उज़्बेकिस्तान-देशाभ्यां यूरेनियम- आपूर्तये दीर्घकालिकव्यवस्थायाः संस्थापने सहमतिः प्रदर्शिता। एतदतिरिक्तं महत्त्वपूर्णानां खनिजसंसाधनानां भूविज्ञानस्य च क्षेत्रे सहयोगार्थम् अपि सन्धिः जातः। एषः सन्धिः भारतस्य ऊर्जासुरक्षायाः सामरिकखनिजावश्यकतानां च दृष्ट्या महत्त्वपूर्णः मन्यते।

# हिमाचलस्य घेपन-घाट-सरोवरः वर्धयति सङ्कटम्, ३३ वर्षेषु १७८ प्रतिशतं विस्तृतम् अभवत् क्षेत्रफलम्

हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।
नेपालदेशे सञ्जाता भीषणत्रासदी हिमालयस्य उन्नतशिखरेषु स्थितानां हिमानी-सरोवराणां सङ्कटं पुनः पुरतः आनीतवती। हिमाचलप्रदेशे जनजातीयमण्डले लाहौल-स्पीतौ स्थितः 'घेपन- घाट- हिमानी- सरोवरः' अस्याः चिन्तायाः प्रमुखं केन्द्रं वर्तते। उपग्रह- अध्ययनानुसारं १९८९ तमे वर्षे ३६.४९ हेक्टेयर-परिमित- क्षेत्रे विस्तृतः अयं सरोवरः २०२२ तमे वर्षे वर्धित्वा १०१.३० हेक्टेयर- परिमितः सञ्जातः। अर्थात् ३३ वर्षेषु अस्य क्षेत्रफलं प्रायः १७८ प्रतिशतं वर्धितं, सरोवरश्च प्रायः त्रिगुणितः जातः। अयं सरोवरः प्रायः ४,०६८ मीटर- औन्नत्ये स्थितः अस्ति। अस्य दैर्घ्यं २.४६४ किलोमीटर् तथा च अधिकाधिकविस्तारः प्रायः ६२५ मीटर अस्ति। सरोवरे प्रायः ३५.०८ दशलक्ष- घनमीटर- परिमितं जलं भवितुम् अनुमानितम्। वैज्ञानिकानां मते हिमानीनां द्रुतगत्या विगलनेन, परिवर्तनशील-ऋतुना सह सरोवरस्य वर्धमानः आकारः चिन्तायाः विषयः अस्ति।
घेपन-घाट-सरोवरं सम्बन्ध्य महती चिन्ता अस्य सम्भावित- विदारणेन उत्पद्यमानस्य 'हिमानी- सरोवर- विस्फोट- जलप्लावनस्य' वर्तते। राष्ट्रीय- सुदूर- संवेदन- केन्द्रेण कृते सङ्कट- मूल्याङ्कने सरोवरात् निःसरतः जलप्लावनस्य विविधानां सम्भाव्य- परिदृश्यानाम् अध्ययनं कृतम्। मूल्याङ्कनानुसारं 'सिस्सू' क्षेत्रं सर्वाधिक- संवेदनशील- क्षेत्रेषु अन्यतमं वर्तते, निकृष्टतमायां स्थितौ सरोवर-विदारणस्य प्रायः २१ निमेषेषु जलप्लावनस्य तरङ्गाः सिस्सूस्थानं प्राप्तुं शक्नुवन्ति। जलस्य वेगः प्रायः प्रतिघण्टां ४३ किलोमीटर, जलप्लावनस्य गम्भीरता २० मीटर् पर्यन्तं भवितुम् अनुमानिता। जलेन सह शिलाखण्डानां, बृहत्प्रस्तराणां, हिमस्य- अवकरस्य च आगमनेन हानिः वर्धितुं शक्नोति। अध्ययनानुसारं सम्भावित-जलप्लावेन ३४ बस्तयः, प्रायः २०४ हेक्टेयर-परिमितिः कृषियोग्या भूमिः, ५७ सेतवः, प्रायः १०६ किलोमीटर-दीर्घः मार्गः प्रभाविताः भवितुं शक्नुवन्ति। अस्य प्रभावः चन्द्रभागानद्याः (चिनाब) मार्गेण हिमाचलप्रदेशात् अग्रे जम्मू-कश्मीरं यावत् प्राप्तुम् आशङ्क्यते।
वैज्ञानिक- मूल्याङ्कनमाध्यमेन क्रियते निरीक्षणम्- हिमाचलप्रदेशे संवेदनशील-हिमानी-सरोवराणां निरीक्षणम् उपग्रहचित्राणां, सुदूर-संवेदनस्य (रिमोट सेन्सिंग) वैज्ञानिक-मूल्याङ्कनस्य माध्यमेन क्रियमाणम् अस्ति। घेपन-घाट-सरोवराय सम्भावित- जलप्लावेन प्रभावयुक्तानां क्षेत्राणां मानचित्राणि अपि सज्जीकृतानि। केन्द्रसर्वकारेण हिमानी- सरोवराणां सङ्कटं न्यूनीकर्तुं निरीक्षण- प्रारम्भिक- सचेतना- व्यवस्थायाः उपरि कार्यं प्रारब्धम्। घेपन-सरोवरे सम्प्रति पूर्णा प्राक्- सूचनाप्रणाली न स्थापिता अस्ति। तथापि 'सी- डैक' द्वारा विकसिता एका प्रायोगिकी सचेतनाप्रणाली सिस्सू- स्थानस्य कृत्रिम-सरोवरस्य समीपे परीक्षणस्तरे वर्तते। अत्र तापमानस्य, वायोः, वातभारस्य, वृष्टेः च स्थितीनां निरीक्षणेन सह छायाचित्रक- उपग्रह- आधारित- चेतावनी- व्यवस्थायाः परीक्षणं क्रियमाणम् अस्ति।

# संस्कारभारती-पालमपुरद्वारा श्रीशक्तिचन्द्रराणा श्रीरमेशचन्द्रसोनी श्रीमती कमलेश सूद च कला-साहित्ययोः उत्कृष्टयोगदानाय 'कलागुरुसम्मानेन' सम्मानिताः



हिमसंस्कृतवार्ता, डॉ.अमनदीपशर्मा, पालमपुरम् (हिमाचलप्रदेशः): कलायाः साहित्यस्य च अखिलभारतीयसंस्थया संस्कारभारती-पालमपुर-इकाई द्वारा गुरुपूर्णिमायाः पावनावसरे पालमपुरस्य प्रेसक्लब-सभागारे गरिमापूर्णः 'कलागुरुसम्मानसमारोहः-२०२६' आयोजितः।अस्य समारोहस्य अध्यक्षता संस्कारभारती-पालमपुर-इकाई इत्यस्य अध्यक्षा श्रीमती सुरेशलता अवस्थी महोदया अकरोत्अस्मिन् समारोहे विविधकलाविधासु विशिष्टयोगदानं दत्तवन्तः त्रयः वरिष्ठकलागुरवः— श्रीशक्तिचन्द्रराणा 'शक्ति' (मलघोटा, बैजनाथ), श्रीरमेशचन्द्रसोनी (सलियाणा) तथा श्रीमती कमलेश सूद (पालमपुरम्)— कला-साहित्ययोः उत्कृष्टयोगदानाय 'कलागुरुसम्मानेन' सम्मानिताः।कार्यक्रमे संस्कारभारती-काङ्गडायाः विभागसंयोजकः डॉ. जन्मेजयगुलेरिया महोदयः मुख्यातिथिरूपेण उपस्थितः अभवत्। सः स्वीयसम्बोधने गुरुशिष्यपरम्परायाः महत्त्वं तथा समाजे कलायाः महत्त्वपूर्णां भूमिकां प्रकाशयत्। समारोहस्य मुख्याकर्षणं कलागुरूणां शिष्यैः प्रस्तुतानि सांस्कृतिककार्यक्रमाणि आसन्। विशेषतः गुरोः श्रीरमेशसोनी महोदयस्य शिष्यैः रागमियाँमल्हारः, रागभीमपलासी तथा एकलतबलावादनम् इत्यादीनां मनोहारिसंगीतप्रस्तुतीनां सह साहित्यिकरचनाभिः अपि उपस्थितानां मनांसि हृतानि।कार्यक्रमस्य मञ्चसञ्चालनं श्रीरजनीशअवस्थी महोदयेन कुशलतया कृतम्। अस्मिन् अवसरे संस्कारभारती-पालमपुर-इकाईयाः मन्त्री ई. प्यारचन्दसिप्पी महोदयः सहितं कलासाहित्ययोः क्षेत्रयोः सम्बद्धाः प्रायः पञ्चाशत् प्रबुद्धजनाः उपस्थिताः भूत्वा समारोहस्य शोभां वर्धितवन्तः।सम्पूर्णः समारोहः गुरुशिष्यपरम्परायाः, भारतीयकलायाः तथा साहित्यस्य गौरवस्य च भावनया अत्यन्तं गरिमापूर्णतया सम्पन्नः।





# क्रीडाभिः, गीतैः अभिनयेन च बालकैः संस्कृतसम्भाषणस्य शिक्षणम्

**हिमसंस्कृतवार्ताः- जौनपुरम्।** 'गृहे गृहे संस्कृतम्' योजनायाः अन्तर्गतं द्वादशदिवसीयस्य सरल- संस्कृतसम्भाषण- शिविरस्य समापनकार्यक्रमः शनिवासरे प्राथमिक- विद्यालये छावन्याम् उत्साहपूर्णवातावरणे सम्पन्नः अभवत्। शिविरकाले बालकैः क्रीडाभिः, गीतैः अभिनयेन च संस्कृतभाषायां सरलवाक्यानां प्रयोगः शिक्षितः तथा समापनसमारोहे स्वप्रतिभायाः सुन्दरं प्रदर्शनं कृतम्। कार्यक्रमस्य शुभारम्भः केन्द्राध्यक्षा बिन्दु पाण्डेय महोदया सरस्वत्याः समक्षं दीपप्रज्वलनेन अकरोत्। सरस्वतीवन्दनानन्तरं छात्रया रुचिना मनोहारिणं नृत्यं प्रस्तुतम्। तदनन्तरं शिविरस्य द्वादशदिनेषु बालकैः अधिगतानां संस्कृत- सम्भाषण- गतिविधीनां, गीतानां, क्रीडानाम् अभिनयस्य प्रस्तुतीकरणं कृतं, यत् उपस्थितैः अतिथिभिः अभिभावकैश्च प्रशंसितम्।
उत्तरप्रदेश- संस्कृतसंस्थानस्य प्रशिक्षिका पूनमसिंह महोदया बालकानां उत्साहपूर्ण- सहभागितायाः परिश्रमस्य च प्रशंसां कृत्वा तेभ्यः धन्यवादं प्रदत्तवती। सा अवदत् यत् क्रीडा- गीत- अभिनयादीनां रोचकगतिविधीनां माध्यमेन संस्कृतस्य शिक्षणेन बालकेषु भाषायाः प्रति सहजाभिरुचिः आत्मविश्वासश्च विकसितौ भवतः। 'गृहे गृहे संस्कृतम्' योजनायाः उद्देश्यं संस्कृतभाषां गृहे गृहे नीत्वा जनजनस्य भाषां कर्तुं प्रयासः अस्ति। विद्यालयस्य प्रधानाध्यापिका बिन्दु सिंह महोदया प्रशिक्षिका पूनमसिंह महोदयायै आभारं प्रकटयन्ती अवदत् यत् तस्याः मार्गदर्शनेन बालकैः यथा आत्मविश्वासेन उत्साहेन च संस्कृतभाषा अधिगता, तेन तेषां मनसि संस्कृतभाषायाः प्रति विशेषाभिरुचिः उत्साहश्च उत्पन्नः। सा प्रशिक्षिकां पुनः विद्यालयम् आगत्य अन्येभ्यः बालकेभ्यः अपि संस्कृतसम्भाषणस्य प्रशिक्षणं दातुम् अनुरोधं कृतवती।
अस्मिन् अवसरे प्रधानाध्यापिका बिन्दुसिंह, केन्द्राध्यक्षा बिन्दुपाण्डेय, सहायकाध्यापिका वन्दनायादव, शिक्षामित्रा पूनमसिंह, छात्रा- छात्राः विद्यालयस्य कर्मचारिवर्गश्च उपस्थितः आसीत्। कार्यक्रमस्य समापनं प्रशिक्षिकया पूनमसिंहमहाभागया कल्याणमन्त्रस्य सामूहिक- उच्चारणेन कारितम्।

# संस्कृतकाव्यं भारतीयसंस्कृतेः आत्मस्वरूपम् तथा कवयः समाजे संस्कारं, संवेदनां, राष्ट्रनिष्ठां च जागरयन्ति- "प्रो. रमाकान्त पाण्डेयः

## उत्तराखण्ड- संस्कृत- विश्वविद्यालये अन्तर्जालीये संस्कृत- सप्ताह- महोत्सवे सञ्जातं भव्यं अखिलभारतीय- संस्कृतकविसम्मेलनम्।




**हिमसंस्कृतवार्ताः- हरिद्वारम्।** उत्तराखण्ड- संस्कृत- विश्वविद्यालये हरिद्वारे "संस्कृत- सप्ताहमहोत्सवः-२०२६" इत्यन्तर्गतं आयोजितम् अखिलभारतीय- संस्कृत- कविसम्मेलनम् गरिमामयेन साहित्यिक- वातावरणेन सह सफलतया सम्पन्नम्। अन्तर्जालमाध्यमेन आयोजिते अस्मिन् राष्ट्रीय-कविसम्मेलने देशस्य विविधप्रदेशेभ्यः आगतैः प्रख्यातैः संस्कृतकविभिः राष्ट्रं, संस्कृतिः, प्रकृतिः, अध्यात्मं तथा मानवीयमूल्यानि विषयीकृत्य स्वीयानां मौलिककवितानां सस्वरं काव्यपाठः कृतः।कार्यक्रमस्य अध्यक्षतां विश्वविद्यालयस्य कुलपतिः प्रो. रमाकान्तपाण्डेयः अकरोत्, संयोजनं च डॉ. प्रकाशचन्द्रपन्तः अकरोत्। अध्यक्षीयसम्बोधने कुलपतिना उक्तं यत् संस्कृतकाव्यं भारतीयसंस्कृतेः आत्मस्वरूपम् अस्ति तथा कवयः समाजे संस्कारं, संवेदनां, राष्ट्रनिष्ठां च जागरयन्ति। कविसम्मेलने प्रो. रामविनयसिंहः, प्रो. निरञ्जनमिश्रः, प्रो. सुरचनात्रिवेदी, डॉ. सिंहासनपाण्डेयः, डॉ. राजकुमारमिश्रः, प्रो. अरविन्दनारायणमिश्रः, डॉ. सोमेशकश्यपः, प्रो. शैलेशकुमारतिवारी, डॉ. कीर्तिवल्लभशक्टा, डॉ. अरविन्दकुमारतिवारी, डॉ. श्रीनाथधरद्विवेदी, डॉ. शशिकान्ततिवारी, डॉ. अवनीशधरद्विवेदी, डॉ. पङ्कजकुमारझा इत्यादयः कवयः स्वीयकाव्यानां मनोहरं पाठं कृत्वा श्रोतृन् मन्त्र-मुग्धान् अकुर्वन्।कार्यक्रमस्य समापनावसरे संयोजकेन डॉ. प्रकाशचन्द्रपन्तेन सर्वेभ्यः कविभ्यः, विद्वद्भ्यः, सहभागिभ्यश्च हार्दिकं धन्यवादज्ञापनं कृत्वा संस्कृतसाहित्यस्य प्रचारप्रसाराय दृढः सङ्कल्पः पुनरुच्चारितः।

# संस्कृतभाषा संस्कृतेः संस्काराणां च जीवनरेखा- शक्तिपाठकः



**हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः, जम्मू।**

खण्डशिक्षाधिकारी राधाकृष्णशर्मा इत्यस्य मार्गदर्शने क्षेत्रस्य एकादशविद्यालयेषु उत्साहपूर्वकं संस्कृतदिवसः आचरितः। शनिवासरे आयोजितस्य समापनसमारोहस्य शुभारम्भः गुरुकुलस्य विद्यार्थिभिः प्रस्तुतैः मधुरैः वैदिकमङ्गलाचरणैः अभवत्। कार्यक्रमस्य प्रारम्भे गुरुकुलस्य उपप्राचार्यः शशिनाथउपाध्यायः संस्कृतभाषायाः प्रचार- प्रसारस्य, संस्थानेन च सञ्चाल्यमानानां शैक्षणिकसांस्कृतिकप्रयासानां विषये विस्तरेण प्रकाशमकरोत्। संस्थानस्य मुख्यन्यासी शक्तिकुमारपाठकः उक्तं यत् संस्कृतभाषा केवलं भाषा नास्ति, अपि तु अस्माकं संस्कृतेः संस्काराणां च जीवनरेखा अस्ति। तेन सर्वेषाम् अतिथीनां, विदुषां विद्यार्थिनां च मार्गदर्शनं कृत्वा संस्थानस्य निरन्तरप्रगतेः प्रशंसा कृता।खण्डशिक्षा-धिकारी राधाकृष्णशर्मा इत्यनेन विद्यार्थिनः संस्कृतभाषायाः अध्ययनाय भारतीयसंस्कृतेः संरक्षणाय च प्रेरिताः। प्रबुद्धविद्वान् शिवकुमारपाधा इत्यनेन संस्कृतस्य सांस्कृतिकमहत्त्वविषये स्वविचाराः प्रस्तुताः। आचार्यः क्षेमनारायणरेग्मी व्यावहारिकशैल्या क्रीडाभिः सह उपस्थितानां विद्यार्थिनां, अध्यापकानाम् अध्यापिकानां च संस्कृतभाषायाः सरलतां सहजतां च बोधितवान्। आचार्यः प्रवीणमणित्रिपाठी संस्कृतसाहित्यस्य समृद्धपरम्परायाः, आधुनिकयुगे संस्कृतस्य उपादेयतायाः इति विषये गहनतया स्वविचारान् प्रस्तुतवान्। संस्कृतभारती जम्मूकश्मीर इत्यस्य प्रान्तसङ्गठनमन्त्री ऋषिकुमारमिश्रः इत्यनेन संस्कृतभाषायाः मातृभाषारूपेण जनगणनायां प्रोत्साहनं करणीयम् इति प्रतिपादितम्। तेन उक्तं यत् संस्कृत भारती बालकेन्द्रैः गीताशिक्षणकेन्द्रैश्च समाजं जागरूकं संस्कारयुक्तं च कर्तुं महत्त्वपूर्णं कार्यं क्रियते। समाजस्य प्रत्येकवर्गं प्रति संस्कृतभाषां नेतुं, ताञ्च व्यावहारिकजीवने स्वीकर्तुं च तेन आह्वानं कृतम्। समारोहस्य अवसरः विद्यालयानां विद्यार्थिभिः प्रस्तुताभिः विविधाभिः सांस्कृतिकप्रस्तुतिभिः रमणीयः अभवत्। विभिन्नासु प्रतियोगितासु उत्कृष्टं प्रदर्शनं कृतवन्तः विद्यार्थिनः, सहयोगिनः च सम्मानिताः। अन्ते आचार्या डॉ. सोनाली इत्यनया धन्यवादज्ञापनं कृतम्।

# संस्कृतभारत्याः विविधासु प्रतियोगितासु डीपीएस-बोकारो- विद्यालयस्य विद्यार्थिनां उत्कृष्टं प्रदर्शनम्



**हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो।**

संस्कृतभारती- बोकारो- संस्थायाः तत्त्वावधाने आयोजितासु अन्तरविद्यालयीयासु विविधासु संस्कृत-प्रतियोगितासु दिल्ली- पब्लिक- स्कूल- बोकारो-विद्यालयस्य विद्यार्थिभिः उत्कृष्टं प्रदर्शनं कृत्वा विद्यालयस्य गौरवं वर्धितम्। विद्यार्थिभिः श्लोकपाठे, संस्कृतभाषणे, समूहगाने, समूहभावनृत्ये, कूटप्रश्नोत्तर्यां विविधानि पुरस्कारस्थानानि प्राप्तानि।

श्लोकपाठस्य शिशुवर्गे अदीव आर्यन् प्रथमस्थानं प्राप्तवान्। नव्यासिंह, आहनाचौधरी च द्वितीयस्थानं, सम्यक् सिंह, सिद्धार्थभूषणश्च तृतीयस्थानं प्राप्तवन्तौ। किशोरवर्गे राविका झा द्वितीयस्थानं प्राप्तवती, अक्षचन्द्रः, परणिद्या कुमारी च संयुक्तरूपेण तृतीयस्थानं प्राप्तवन्तौ। संस्कृतभाषण-प्रतियोगितायाः तरुणवर्गे अवनी अनन्या पाण्डेया प्रथमस्थानं, नम्या पाण्डेया द्वितीयस्थानं प्राप्तवत्यौ। समूहगान-प्रतियोगितायां डीपीएस-बोकारो-विद्यालयस्य दलं प्रथमस्थानं, समूहभावनृत्य-प्रतियोगितायां च द्वितीयस्थानं प्राप्तवत्।

कूटप्रश्नोत्तरी-प्रतियोगितायां विद्यार्थिभिः स्वकीयां मेधाशक्तिं तर्कक्षमतां च प्रदर्श्य किशोरवर्गे प्रथमस्थानं तथा तरुणवर्गे तृतीयस्थानं प्राप्तम्।उल्लेखनीयं यत् उक्ताः प्रतियोगिताः पूर्वं विभिन्नेषु विद्यालयेषु आयोजिताः आसन्। तासां प्रतियोगितानां विजेतृभ्यः पुरस्कारप्रदानं रविवासरे डीपीएस-बोकारो-विद्यालयस्य प्राङ्गणे आयोजिते संस्कृतदिवस- समारोहे सम्पन्नम्। कार्यक्रमस्य मुख्यातिथिना विद्यालयस्य प्राचार्येण डॉ. ए. एस. गंगवारेण, मुख्यवक्त्रा कामेश्वरसिंह- दरभङ्गा- संस्कृत-विश्वविद्यालयस्य पूर्वकुलपतिना डॉ. चन्द्रकान्तशुक्लेन च विजेतृभ्यः पुरस्काराः प्रदत्ताः। अवसरे प्राचार्यः डॉ. ए. एस. गंगवारः विजेतृभ्यः विद्यार्थिभ्यः अभिनन्दनानि शुभकामनाश्च प्रदत्तवान्। सः संस्कृतभाषया सह विद्यार्थिनां सुदृढसम्बन्धस्य महत्त्वं प्रतिपादयन् अवदत् यत् संस्कृतं बह्वीनां भाषाणां जननी अस्ति। अस्यां भाषायां विज्ञानस्य, गणितस्य तथा जीवनस्य विविधपक्षाणां ज्ञानं निहितम् अस्ति।मुख्यवक्ता डॉ. चन्द्रकान्तशुक्लः संस्कृतस्य राष्ट्रभाषारूपेण स्वीकरणसम्बद्धं संविधानसभायाः ऐतिहासिकं प्रसङ्गं विवृण्वन् जनगणनायां संस्कृतभाषायाः ज्ञातभाषारूपेण पञ्जीकरणस्य आवश्यकतां प्रतिपादितवान्।

समारोहे गिरिडीह-लोकसभाक्षेत्रस्य पूर्वसांसदः रविन्द्रकुमारपाण्डेयः अतिविशिष्टातिथिरूपेण उपस्थितः आसीत्। संस्कृतभारत्याः पदाधिकारिणः, विभिन्नविद्यालयानां शिक्षकाः, विद्यार्थिनः प्रतियोगितानां प्रतिभागिनः चापि समुपस्थिताः आसन्।




## प्राचार्येण अनुजकुमारमिश्रमहाभागेन

### सर्वेभ्यो संस्कृतदिवसस्य शुभकामनाः प्रदत्ताः

हिमसंस्कृतवार्ताः-डीएवी पब्लिक विद्यालयस्य स्वांगस्य प्राचार्येण अनुजकुमारमिश्रमहाभागेन संस्कृतदिवसस्य, स्नेहोत्सवपर्वणः रक्षाबन्धनस्य सर्वेभ्यो छात्रेभ्यो, अभिभावकेभ्यो शिक्षक- शिक्षिकाभ्यश्च शुभकामनाः प्रदत्ताः। अस्मिनुपलक्ष्ये विद्यालये नैके कार्यक्रमाः यथा- रक्षासूत्रनिर्माणप्रतियोगिता, सस्वरश्लोकपाठः, भाषणं, नाट्याभिनयं, सावन- महोत्सवः पितामह मातामही सम्मानमित्यादयः आयोजिताः। कार्यक्रमं दृष्ट्वा सर्वे मुग्धाः अभवन्। अभिभावकैरुक्तं यत् एतादृशमायोजनम् अस्माभिः पूर्वं न दृष्टम्। साम्प्रतम् एतावत् कार्यक्रमस्य महती आवश्यकता वर्तते। अनेन कार्यक्रमेण छात्राः न केवलं ज्ञानं लभन्ते अपि तु ते जीवन कौशलमपि प्राप्नुवन्ति। प्राचार्य महोदयेन सर्वषामागन्तुकानां प्रसन्नमनसामभिनन्दनं कृतम्।



## हरियाणाकेन्द्रीयविश्वविद्यालयस्य संस्कृतविभागे संस्कृतसप्ताहे विभिन्नाः कार्यक्रमाः

हरियाणाकेन्द्रीयविश्वविद्यालयस्य संस्कृतविभागेन आयोज्यमाने संस्कृतसप्ताहे विभिन्नाः कार्यक्रमाः अभवन्, येषु चित्र-रङ्गवल्लीनिर्माण-प्रतियोगिते, ऑनलाइन-प्रश्नोत्तरी, संस्कृतगीतगायन- श्लोकसूत्रवाचन-प्रतियोगिताः, रीलनिर्माण- प्रतियोगिता राष्ट्रियशिक्षानीतौ संस्कृतस्य महत्त्वविषये ऑनलाइन- व्याख्यानञ्च प्रमुखाः सन्ति। विभागाध्यक्षा प्रो. पायलकँवर चन्देलमहोदया उक्तवती यत् एषां सर्वेषां कार्यक्रमाणाम् उद्देश्योऽस्ति जनानां मध्ये भारतीयसंस्कृतिं संस्कृतञ्च प्रति रुचिवर्धनम्। प्रो. चन्देल घोषितवती यत् सितम्बरमासस्य प्रथमदिनाङ्के अस्य संस्कृतसप्ताहस्य समापनं भविष्यति, यस्मिन् विशेषज्ञव्याख्यानं प्रतियोगितानां पुरस्कारवितरणञ्च भविष्यति, सर्वे प्रतिभागिनः प्रमाणपत्राणि अपि प्राप्स्यति। सर्वेषां कृतेऽस्मिन् समापन-समारोहे आमन्त्रणम् अस्ति।

# संस्कृतभारती नलबारीजिला पक्षतः नलबारीमण्डले मरुवा शंकरदेवक्षेत्रे संस्कृतदिवससमारोहः



हिमसंसकृतवार्ता, नलवारी, 30 अगष्ट

समारोहस्य प्रारम्भः दीपप्रज्वलनेन अभवत्। दीपज्वालनं नलबारी-जिला-परिषदः अध्यक्षा श्रीमती गीतुमणि वैश्यः कृतवती।ततः सभापतेः तथा आमन्त्रितानाम् अतिथीनां आसनग्रहणं परिचयश्च सम्पन्नः। अस्मिन् समारोहे संस्कृतभारती नलबारीजनपदः कार्यकर्तारः, कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयस्य अध्यापकौ, संस्कृतभारती उत्तर-असमप्रान्तस्य प्रान्तप्रशिक्षणप्रमुखः डॉ छबिलालउपाध्यायः विद्वद्परिषद्सदस्यः डॉ राजीवलोचनशर्मा बालकेन्द्रनां प्रमुखः कृष्णराजवंशी, मरुवा अञ्चलस्य मातृगणः छात्राः तथा कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयस्य शोधछात्राः छात्राः च उपस्थाय सभायाः सौष्ठवं वर्धितवन्तः।तत्र श्रीनवजित वैश्य इति अनेन उद्देश्यः स्पष्टतया व्याख्यातः।तदनन्तरं सुर-समलय इति वंशी-खोलवादनं प्रस्तुतम्। मुख्यातिथिः श्रीमान् अशोक वैश्यमहोदयः संस्कृतभाषायाः महत्त्वं तथा संस्कृतस्य प्रचार-प्रसारस्य आवश्यकतां विषयीकृत्वा प्रेरणादायकं वक्तव्यं प्रस्तुतवान्। ततः निर्दिष्टवक्तृ - डॉ० राजीव लोचन शर्मामहोदयेन संस्कृतदिवसस्य प्रासङ्गिकताम् उद्दिश्य प्रेरणादायकं वक्तव्यं प्रस्तुतम्। अनन्तरं परिस्मिता शर्मा इति छात्रया संस्कृत-बरगीतमेकं प्रस्तुतम् ।

तदनन्तरं श्रीमान् रातुल शर्मामहोदयेन भाषणं प्रदत्तम्। ततः श्रीमान् विनोद चन्द्रः वरुवा सामाजिकविषयेषु स्वकीयाः विचाराः प्रस्तुताः। अन्ते सभापतिः डॉ० दीपज्योति बरपूजारी स्वकीयेन मन्तव्येन उपस्थितान् सम्बोधितवान्। तदनन्तरं डॉ० सञ्जय दास महोदयेन कृतज्ञताज्ञापनं कृतम्। अन्ते जिलायाः प्रशिक्षणप्रमुखायाः ज्योतिस्मितायाः कल्याणमन्त्रपाठेन कार्यक्रमस्य समापनम् अभवत्।

कार्यक्रमे चत्वारिंशत् जनाः उपस्थिताः आसन्।

समग्रतः संस्कृत-दिवस-समारोहः अत्यन्तं सफलः, ज्ञानवर्धकः, प्रेरणादायकश्च अभवत्। समारोहस्य माध्यमेन संस्कृतभाषायाः महत्त्वं तथा तस्याः प्रचार-प्रसारस्य आवश्यकता सर्वेषां समक्षं प्रतिपादिता। उपस्थितैः सर्वैः संस्कृतभाषायाः संरक्षणाय, संवर्धनाय च सहयोगस्य संकल्पः कृतः।

# संस्कृतजयघोषैः देहरादूननगरे संस्कृतमयं सञ्जातं वातावरणम् — दिव्यसंस्कृतशोभायात्रया सह 'गेहे गेहे संस्कृतम्' कार्यक्रमः सम्पन्नः



देहरादूनम्, संस्कृतभारती-देहरादूनस्य श्रीकृष्णमन्दिरसमितेश्च संयुक्ततत्त्वावधाने संस्कृतसप्ताहस्य उपलक्ष्य बुधवासरे कृष्णविहारे मोहकमपुरे स्थिते श्रीकृष्णमन्दिरे 'गेहे गेहे संस्कृतम्' इति कार्यक्रमः आयोजितः। कार्यक्रमस्य विषयः आसीत्— "संस्कृतं भारतनिर्माणस्य समर्थभारतस्य च सोपानम्"। कार्यक्रमस्य समापनं दिव्यसंस्कृतशोभायात्रया अभवत्। कार्यक्रमस्य अन्तर्गतं आयोजितायां संस्कृतशोभायात्रायां संस्कृतभाषायाः प्रचार-प्रसारस्य, संरक्षणस्य, संवर्धनस्य च सन्देशः जनसामान्यं प्रति प्रदत्तः। शोभायात्रायाः पूर्वम् आयोजिते अभिमुखीकरणकार्यक्रमे संस्कृतभारत्याः प्रान्तकुटुम्बशिक्षणप्रमुखः श्रीनागेन्द्रव्यासः सञ्चालनं कृतवान्। तेन उपस्थितानां कार्यकर्तॄणां जनानां च कार्यक्रमस्य उद्देश्यम्, स्वरूपं तथा संस्कृतस्य परिवारजीवने सामाजिकव्यवहारे च प्रयोगस्य आवश्यकतां प्रति मार्गदर्शनं प्रदत्तम्।

अस्मिन् अवसरे विभागसंयोजकेन डॉ. प्रदीपसेमवालेन बोधनं प्रदत्तम्। तेन उक्तं यत् संस्कृतं केवलं प्राचीनज्ञानस्य भाषा नास्ति, अपितु भारतीयसंस्कृतेः, परम्परायाः, जीवनमूल्यानां राष्ट्रियचेतनायाश्च सुदृढं माध्यमम् अस्ति। संस्कृतस्य गृहं गृहं प्रति प्रचारं कृत्वा एव समाजे संस्कृतभाषायाः स्वाभाविकं वातावरणं निर्मातुं शक्यते।

कार्यक्रमे जिलासम्पर्कप्रमुखः श्रीधीरजमैठाणी, डोईवालाखण्डसंयोजकः डॉ. आनन्दमोहनजोशी, बंजारावालाबस्तीप्रमुखा डॉ. उर्मिला, रायपुरखण्डसंयोजकः डॉ. वीणापुरोहितः इत्येते सहिताः अनेके कार्यकर्तारः उपस्थिताः सन्तः कार्यक्रमस्य सफलतायै महत्त्वपूर्णां भूमिकां निर्व्यूढवन्तः। मन्दिरसमित्याः पदाधिकारिभिः उपस्थितजनानां मार्गदर्शनं कृत्वा संस्कृतभाषायाः संरक्षण-संवर्धनार्थं सामूहिकप्रयत्नानाम् आह्वानं कृतम्।

कार्यक्रमे संस्कृतभारत्या श्रीकृष्णमन्दिरसमित्या च सम्बद्धाः अनेके पदाधिकारिणः कार्यकर्तारश्च उपस्थिताः आसन्। तेषु आचार्यःकवीन्द्रबडोनी , श्री डी. पी. थपलियालः (संरक्षकः), श्री टी. पी. सेमवालः (अध्यक्षः), श्री सुमेरसिंहनगी (कोषाध्यक्षः), श्री मोहनसिंहनगी (पूर्वाध्यक्षः), श्री हरिदत्तव्यासः (पूर्वप्रधानाचार्यः), श्री रमेशकुकशालः, श्री दिनेशकुकशालः, श्री मोहनलालकालः, श्री विमलप्रसादनैथानी, श्री मधुप्रसादसती, श्री सुमितदेवरानी, श्री सुरेशशर्मा, श्री के. एन. सती, श्री दिग्विजयव्यासः तथा श्री शशिधरअमोली प्रमुखतया उपस्थिताः आसन्।

मातृशक्तेः पक्षतः श्रीमती भुवनेश्वरीव्यासः, श्रीमती देवेश्वरीभद्री, श्रीमती वीणाभण्डारी, श्रीमती आशाकुकशालः, श्रीमती सरोजदेवी, श्रीमती देवेश्वरीराणा, श्रीमती देवेश्वरीभण्डारी, श्रीमती मञ्जुममगाईं, श्रीमती सर्वेश्वरीघिल्डियालः, श्रीमती ममताव्यासः, श्रीमती ममतामैठाणी, श्रीमती यशोदावतूड़ी, श्रीमती संगीता बडोनी, श्रीमती प्रियंका बडोनी, श्रीमती दीपा गुसाईं, श्रीमती रीना पंचपुरी तथा श्रीमती राधासती सहिताः अनेकाः महिलाः उपस्थिताः आसन्।

कार्यक्रमे उपस्थितैः जनैः संस्कृतस्य प्रचार-प्रसारं कर्तुं तथा संस्कृतं जनानां गृहं गृहं प्रति नेतुं संकल्पः कृतः। संस्कृतघोषैः कार्यक्रमस्थलं संस्कृतमयं जातम्। आयोजकैः उक्तं यत् 'गेहे गेहे संस्कृतम्' इत्यस्य मुख्योद्देश्यं संस्कृतं केवलं पठनपाठनस्य भाषा न स्थापयित्वा तां परिवारस्य व्यवहारस्य संवादस्य संस्कारस्य च भाषां कर्तुम् अस्ति।

अन्ते संस्कृतभारत्याः कार्यकर्तॄणां श्रीकृष्णमन्दिरसमित्याः पदाधिकारिणां स्थानीयजनानां च सहयोगेन कार्यक्रमः सफलतया सम्पन्नः। दिव्यसंस्कृतशोभायात्रया संस्कृतभाषायाः प्रचारस्य जनजागरणस्य च प्रभाविनं सन्देशं प्रदाय कार्यक्रमस्य गरिमापूर्णं समापनं कृतम्।




# अस्माकं समुन्नतेः मूलस्रोतः संस्कृतमेव — डॉ. सूर्यमोहनभट्टः

देहरादूनम्, संस्कृतभारतीदेहरादूनस्य संयुक्ततत्त्वावधाने संस्कृतसप्ताहम् उपलक्ष्य देहरादूनस्थे सरस्वतीविहारस्य सामुदायिकभवने 'गेहे गेहे संस्कृतम्' इति कार्यक्रमः आयोजितः। कार्यक्रमस्य मुख्यविषयः "संस्कृतभारत-निर्माणम्, समर्थभारत-सोपानम्" इति आसीत्। कार्यक्रमस्य शुभारम्भः संस्कृतगीतेन मन्त्रोच्चारणेन च अभवत्। समागमस्य स्वागतं संस्कृतभारत्याः परिचयं च विभागसंयोजकेन डॉ. प्रदीपसेमवालेन कारितम्।कार्यक्रमस्य अध्यक्षतां शिवनाथसंस्कृतविद्यालयस्य पूर्वप्राचार्यः व्याकरणाचार्यश्च श्रीसूर्यमोहनभट्टः अकरोत्। सः स्वकीये अध्यक्षीयवक्तव्ये अवदत् यत् संस्कृतं भारतस्य ज्ञानस्य, संस्कृतेः संस्काराणां च मूलभाषा अस्ति। संस्कृतं केवलं विद्यालयेषु महाविद्यालयेषु च सीमितं न भवेत्, अपितु गेहे गेहे दैनिकव्यवहारे च प्रतिष्ठापनीयम्। 'गेहे गेहे संस्कृतम्' इत्यादयः कार्यक्रमाः संस्कृतं जनसामान्येन सह संयोजयितुं महत्त्वपूर्णां भूमिकां निर्वहन्ति। अस्माकं समुन्नतेः मूलस्रोतः संस्कृतमेव अस्ति।मुख्यातिथिः राष्ट्रियस्वयंसेवकसंघस्य उपाध्यक्षः आचार्यसुभाषजोशी स्वसम्बोधने अवदत् यत् संस्कृतं भारतीयसंस्कृतेः संवाहिका भाषा अस्ति। भारतं सांस्कृतिकदृष्ट्या सशक्तं निर्मातुं संस्कृतस्य महत्त्वपूर्णा भूमिका अस्ति। सः संस्कृतस्य अधिकाधिकप्रयोगाय तस्य जन-जनपर्यन्तं प्रसाराय च आह्वानम् अकरोत्।विशिष्टातिथिः शिवनाथसंस्कृतविद्यालयस्य सहाचार्यः डॉ. मुकेशखण्डूरी अवदत् यत् संस्कृतं केवलं प्राचीना भाषा नास्ति, अपितु भारतस्य समृद्धज्ञानपरम्परायाः आधारः अस्ति। संस्कृतस्य अध्ययनेन व्यवहारेण च नूतनसंततिः भारतीयसंस्कृत्या, परम्परया संस्कारैश्च सह संयोजयितुं शक्यते। सः 'गेहे गेहे संस्कृतम्' अभियानं परिवारपर्यन्तं प्रापयितुं विशेषं बलम् अददात्। कथाव्यासः विद्वत्सभायाः भूतपूर्वमहासचिवश्च आचार्यदिनेशप्रसादभट्टः स्ववक्तव्ये संस्कृतभाषायाः व्यापकत्वं वैज्ञानिकत्वं च प्रतिपादितवान्। सः अवदत् यत् संस्कृतं जनभाषारूपेण विकसितुं प्रत्येकेण परिवारेण स्वदैनिकजीवने संस्कृतस्य सरलशब्दानां वाक्यानां च प्रयोगः आरभ्येत। संस्कृतस्य संरक्षणं संवर्धनं च समाजस्य सामूहिकं दायित्वम् इति सः अवदत्। कार्यक्रमस्य अन्ते डॉ. रामभूषणबिजल्वाणः धन्यवादज्ञापनं कुर्वन् सर्वेषाम् अतिथीनां, संस्कृतभारत्याः कार्यकर्तृणाम् उपस्थितानां संस्कृतप्रेमिणां च प्रति आभारं प्रकटितवान्। कार्यक्रमस्य समापने शान्तिमन्त्रस्य सामूहिकोच्चारणम् अभवत्। ततः शोभायात्रा निष्कासिता। शोभायात्रया संस्कृतस्य प्रचारप्रसारस्य भारतीयसंस्कृतेः संरक्षणस्य च सन्देशः प्रदत्तः। कार्यक्रमे विद्वत्सभायाः उपाध्यक्षः सत्यप्रसादसेमवालः, जनपदसम्पर्कप्रमुखः धीरजमैठाणी, डोईवालाखण्डसंयोजिका डॉ. बीनापुरोहिता, महानगरमन्त्री नितीशमैठाणी, बंजारावालाबस्तीप्रमुखा उर्मिलाशाक्ता तथा संयोजकः आचार्यकवीन्द्रबडोनी इत्यादयः अनेके संस्कृतप्रेमिणः गणमान्यनागरिकाश्च उपस्थिताः आसन्।

# शासकीय-उच्च-माध्यमिक-विद्यालये फास्टरपुरे संस्कृत-सप्ताहस्य पञ्चमे दिवसे विविधाः कार्यक्रमाः आयोजिताः



**फास्टरपुरम्, मुंगेली-मण्डलम्, छत्तीसगढ़म् | दिनाङ्कः २९ अगस्त २०२६।** शासकीय-उच्च-माध्यमिक-विद्यालये फास्टरपुरे, मुंगेली-मण्डले, छत्तीसगढ़-प्रदेशे, दिनाङ्के २९ अगस्त २०२६ तमे दिने संस्कृतसप्ताहस्य पञ्चमदिवसस्य उपलक्ष्ये विविधाः कार्यक्रमाः उत्साहपूर्वकं आयोजिताः। कार्यक्रमस्य शुभारम्भः प्रभारी-प्राचार्येण श्री पी. के. घिर्रे-महोदयेन मातुः सरस्वत्याः पूजनेन वन्दनया च कृतः। अस्मिन् अवसरे प्रभारी-प्राचार्यः श्री पी. के. घिर्रे-महोदयः विद्यार्थिभ्यः संस्कृतभाषायाः संस्कृतविषयस्य च महत्त्वं विषये विस्तरेण अवगतं कारितवान्। सः अवदत् यत् संस्कृतभाषा अस्माकं प्राचीना भाा अस्ति।

# विद्याभारती हरियाणा द्वारा संस्कृत-प्रश्नमञ्चस्य आयोजनं कृतम्



संस्कृतसप्ताहस्य उपलक्ष्ये प्रतिवर्षं विद्या भारती हरियाणा-प्रान्तेन संस्कृतभाषायाः प्रचार-प्रसाराय विविधाः कार्यक्रमाः आयोज्यन्ते। अस्मिन् वर्षेऽपि प्रान्तस्तरे द्वयोः संस्कृतप्रश्नमञ्चयोः आयोजनं कृतम्।
प्रथमः प्रश्नमञ्चः संस्कृतविषयम् अतिरिच्य अन्यविषयाणाम् आचार्याणां कृते आयोजितः। अस्मिन् प्रश्नमञ्चे संस्कृतस्य व्यावहारिकशब्दावलीं ध्येयवाक्यानि च आधृत्य विविधाः प्रश्नाः पृष्टाः।
द्वितीयः प्रश्नमञ्चः संस्कृताचार्याणां कृते आयोजितः। अस्मिन् संस्कृतव्याकरणम्, शब्दरूपाणि, धातुरूपाणि, सुभाषितानि, ध्येयवाक्यानि च आधृत्य प्रश्नाः पृष्टाः। उभयोः प्रश्नमञ्चयोः प्रायः ५५० आचार्याः सोत्साहं सहभागिताम् अकुर्वन्। आचार्यैः सह विभिन्नविद्यालयानां प्राचार्याः तथा विद्या भारत्याः विविधाः अधिकारिणः अपि उत्साहपूर्वकं प्रश्नमञ्चयोः सहभागिताम् अकुर्वन्। प्रश्नमञ्चस्य शुभारम्भः विद्या भारती उत्तरक्षेत्रस्य माननीय-संघटनमन्त्रिणा श्रीविजयनड्डामहोदयेन तथा सह-संघटनमन्त्रिणा श्रीबालकृष्णमहोदयेन कृतः। एतयोः प्रश्नमञ्चयोः प्रमुखम् उद्देश्यम् आचार्येषु संस्कृतभाषायाः प्रति रुचिवर्धनम्, संस्कृतस्य व्यावहारिकप्रयोगस्य प्रोत्साहनम् तथा संस्कृतज्ञानस्य संवर्धनम् आसीत्। आचार्याणाम् उत्साहपूर्णा सहभागिता कार्यक्रमस्य सफलतायाः परिचायिका अभवत्।
सम्पूर्णस्य प्रश्नमञ्चस्य सञ्चालनं विद्याभारती हरियाणा-प्रान्तस्य संस्कृत-संयोजकेन श्रीभूपेन्द्रशर्ममहोदयेन तथा उत्तरक्षेत्रस्य संस्कृत-संयोजकेन श्रीनारायणसिंहमहोदयेन कुशलतापूर्वकं कृतम्।अस्मिन् प्रश्नमञ्चे विद्या भारत्याः अखिलभारतीय-संस्कृतविषय-संयोजकः श्रीउपेन्द्रशास्त्रीमहोदयः अपि सहभागिताम् अकरोत्। तेन प्रश्नमञ्चस्य सम्यगवलोकनं कृतम्। प्रश्नमञ्चस्य सुव्यवस्थितम् आयोजनं, प्रश्नानां गुणवत्तां, आचार्याणाम् उत्साहपूर्णां सहभागितां च दृष्ट्वा सः अत्यन्तं प्रसन्नः अभवत्।
श्रीउपेन्द्रशास्त्रीमहोदयेन संस्कृतविभागेन कृतस्य अथकपरिश्रमस्य मुक्तकण्ठेन भूरि भूरि प्रशंसा कृता। संस्कृतभाषायाः प्रचार-प्रसाराय तथा आचार्येषु संस्कृतस्य व्यावहारिकप्रयोगं प्रति अभिरुचिवर्धनाय एतादृशानाम् आयोजनानां महत्त्वमपि तेन प्रतिपादितम्।

# राष्ट्रीय-नारी-गौरव-सम्मानेन सम्मानिता

# डॉ. सुमनराणी महोदया




**हिमसंस्कृतवार्ता, ३० अगस्त २०२६, रविवासरः, नारनौलनगरम् ।**

भारतीय-वैदिक-महासङ्घेन आयोजितः आर्य-महिला-महाकुम्भ-महोत्सवः भारतीय-वैदिक-महासङ्घेन आयोजिते विराट् आर्य-महिला-महाकुम्भे वैदिक-संस्कृतेः, नारी-शक्तेः, राष्ट्र-निर्माणस्य च दिव्य-विषये गहन-चिन्तनं प्रस्तुतम्। अस्य भव्य-समारोहस्य मुख्यवक्त्रीरूपेण हरियाणाकेन्द्रीयविश्वविद्यालये स्वामी-दयानन्द-सरस्वती-पीठे अध्यक्षापदमलंकुर्वाणा सुप्रसिद्धा विदुषी डॉ. सुमनराणी महोदया उपस्थिता भूत्वा वैदिक-दृष्ट्या परिवारं समाजं च प्रति नार्याः भूमिका, कर्तव्यं, राष्ट्रे च तस्याः योगदानम् इत्यादीन् विषयान् ओजस्वि-वाण्या प्रतिपादितवती।अस्मिन् पावन-अवसरे महेन्द्रगढ-विधानसभा-क्षेत्रस्य लोकप्रियविधायकः माननीयः श्री-कंवरसिंह-यादव-महोदयः, परम-वन्दनीया ब्रह्मवादिनी भगिनी कलावती-महोदया च स्वकीयकरकमलाभ्यां मुख्यवक्त्री-महोदयायै "राष्ट्रीय-नारी-गौरव-सम्मानः" समर्पितः । अयं सम्मान-क्षणः सर्वेषां कृते हर्ष-गौरव-प्रदः आसीत्। अस्य महाकुम्भस्य मुख्यातिथिरूपेण आचार्यकुलम्, हरिद्वारस्य अध्यक्षा परमादरणीया भगिनी ऋतंभरा-महोदया, तस्याः पतिदेवः पतञ्जलि-ग्रामोद्योग-हरिद्वारस्य महामन्त्री श्रद्धेय-भ्रातृवर्यः यशदेवशास्त्री महोदयश्च विशेषरूपेण उपस्थितौ आस्ताम्। अनयोः गरिमामयी उपस्थितिः, आत्मीय-स्नेहः, प्रेरणादायी आशीर्वचनञ्च समारोहस्य शोभां द्विगुणितां अकुर्वन्। समारोहेऽस्मिन् अन्येऽपि वक्तारः वैदिकवाङ्मये स्त्रीणां कीदृशी स्थिति आसीदिति उल्लिख्य वर्तमाने समाजं राष्ट्रं च प्रति कर्तव्यं योगदानं चापि स्वविचारोत्तेजकवचोभिः सम्यक्तया विवेचितवन्तः।

सम्मान-ग्रहण-अवसरे मुख्यवक्त्री-महोदया अवदत् -यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः इति वैदिक-उदात्त-भावनायाः साक्षात् प्रतीकस्वरूपः अयं सम्मानः मम कृते केवलं सम्मानमात्रं नास्ति, अपितु भारतीय-संस्कृतेः राष्ट्रसेवायाश्च कृते अधिक-निष्ठया, समर्पणेन, ऊर्जया च कार्यं कर्तुं नवीन-संकल्पः, प्रेरणा, पाथेयञ्च अस्ति। तदर्थं भारतीय-वैदिक-महासङ्घस्य संरक्षक-मण्डलस्य, पदाधिकारि-वृन्दस्य, आयोजन-समितेः सर्वेषां माननीय-सदस्यानां, विशेषतः माननीय-विधायक-श्री-कंवरसिंह-यादव-महोदयस्य च हृदयस्य अन्तस्तलात् हार्दा कृतज्ञता ज्ञापिता। वैदिकशान्तिपाठेन अस्य भव्य-समारोहस्य समाप्तिः संजाता इति।



## "संस्कृत कथा मञ्जरी"

## द्वात्रिंशत्पुत्तलिकासिंहासनम्

## "अथ मणिकारसंवादो नाम पञ्चमोपाख्यानम्" (१)

अथ पुनः तथैव सिंहासनं समाक्रमितुकामं मालवेन्द्रं ततो निवार्य्य अन्या पुत्तलिका समवोचत्- भो राजन्! श्रूयताम्- विक्रमार्के राज्यं कुर्वति, एकदा कश्चिद्रत्नवणिक् समागत्य, रत्नमनर्घम् एकं राजहस्ते समर्पितवान्। राजाऽपि देदीप्यमानं तद्रत्नं दृष्ट्वा परीक्षकानाकार्य्यावदत्- भो परीक्षकाः! कीदृशमेतद्रत्नम्? समीचीनम् असमीचीनं वा? अस्य मूल्यं कुर्वन्तु। तैस्तद्रत्नं परीक्ष्य भणितं- भो राजन्! अमूल्यमेतद्रत्नम्। अस्य मूल्यमविदित्वाऽपि क्रियते चेत्, तर्हि महाप्रत्यवाय; अस्माकं भविष्यति। तेषां वचनं श्रुत्वा राजा भूरि द्रव्यं दत्वा भणति स्म- भो वणिक्! ईदृशं रत्नमन्यदस्ति किम्? वणिजा भणितं- देव! एतत्सदृशानि रत्नानि इह आनीतानि न सन्ति, परं ग्रामे एवंविधान्येव दश रत्नानि विद्यन्ते। यदि प्रयोजनमस्ति, तर्हि तेषां मूल्यं कृत्वा गृह्यताम्। ततः परीक्षकैः एकैकस्य रत्नस्य षट्कोटिसुवर्णं मूल्यं कृतम्। राज्ञा तावत् सुवर्णं तस्मै वणिजे दत्तं तेन सह विश्वासो कश्चित् भृत्यो मणिकारञ्च प्रेषितः; उक्तञ्च- भो मणिकार! अष्टानां वासराणां मध्ये रत्नानि गृहीत्वा आयास्यासि चेत् उचितं तव दास्यामि। तेनोक्तं- देव! अष्टानां दिवसानां मध्ये एव चरणौ द्रक्ष्यामि। अन्यथा चेत् दण्ड्योऽहम्।एवमुक्त्वा स मणिकारस्तेन वणिजां सह तस्य निवासनगरं गतः। तत्र तेन दश रत्नानि दत्तानि। तानि गृहीत्वा मार्गे यावदागच्छति, तावन्महती वृष्टिरभूत्। तया वृष्ट्या उभयतट परिपूर्णा नदी प्रहवति स्म। ततः अपरं तीरं गन्तुमशक्नुवन्, तत्र तटस्थितं नाविकमवदत्- भो कर्णधार! मां नदीम् उत्तारय। सोऽवदत्- हे पथिक! एषा नदी वेलाम् अतिक्रम्य वर्तते, कथमुत्तार्य्यते? प्रबलनद्युत्तरणं बुद्धिमतां वर्जनीयम्।मणिकारेणोक्तं- भो कर्णधार! त्वया यदुक्तं तत् सत्यमेव, तथाऽपि मम महत् कार्य्यमस्ति, सामान्यकार्य्याद्विशेषकार्य्यं बलवद्भवति। अतः मम नद्युत्तरणं सामान्य, राजकार्य्यं बलवत्। कर्णधारेणोक्तं- महद्रजकार्य्यं, तत् किम्? मणिकारिणोक्तम्- अद्य दश रत्नानि गृहीत्वा राजसमीपं न गमिष्यामि चेत् आज्ञाभङ्गाद्राजा निग्रहं करिष्यति। नाविकेनोक्तं- तेषां रत्नानि मध्ये मह्यं पञ्च रत्नानि दास्यसि चेत् तर्हि त्वां नदीमुत्तारयिष्यामि।

**डॉ. वर्षा प्रकाश टोणगांवकर**

**पुणे, महाराष्ट्रम्**

## " संस्कृत कथा मञ्जिरी"{११}

## द्वात्रिंशत्पुत्तलिकासिंहासनम्

## अथ मणिकारोसंवादो नाम

## पञ्चमोपाख्यनम् (२)

ततो मणिकारतस्मै नाविकाय पञ्च रत्नानि दत्त्वा ,नदीमुत्तीर्य्य राजसमीपमागत्य तस्य हस्ते पञ्च रत्नानि ददौ ।राजाऽब्रवीत-- भो मणिकार! किं पञ्चैव रत्नानि समानितानि? अवशिष्टानि पञ्च किं कृतानि ? मणिकारेणोक्तं-- देव ! श्रूयतां विज्ञाप्यं मे; अस्मान्नगरात् निर्गत्य तेन वणिजा सह तन्नगरं गत्वा तेन दत्तानि दश रत्नानि गृहीत्वा, ततो निर्गत्य यावदागच्छामि, तावन्मार्गे प्रबलवृष्ट्या नदी उभयतटं विलङ्ग्य प्रबलोदकः प्रवहति ।'अष्टानां दिनानां मध्ये स्वामिचरणौ द्रष्टव्यौ, नदी च दुस्तरां ' इति विचार्य्य नद्युत्तरणाय नाविकाय पञ्च रत्नानि दत्तानि, पञ्च देवसमीपमानीतानि ।यद्यष्टदिनानां मध्ये नागम्यते तदा आज्ञाभङ्गात् स्वामिनश्चेतासि दुःखं स्यात् ।यथा-- "



**आज्ञाभङ्गो नरेन्द्राणां विप्राणां मानखण्डनम् ।**
**पृथक् शय्या च नारीणामशस्त्रो वध उच्यते ॥"**

इति विचार्य्य दत्तानि ।राजाऽपि तद्वचनं श्रुत्वा सन्तुष्टः सन् अवशिष्टानि पञ्च रत्नानि तस्मै मणिकाराय ददौ ।

इति कथां कथयित्वा पुनर्भोजमवदत् पुत्तलिका-- परमौदार्य्यगुणवरिष्ठो विक्रमादित्यः।त्वयि एतादृशमौदार्य्यं यदि विद्यते, तर्ह्यस्मिन् सिंहासने समुपविश ।

राजा तूष्णीमासीत् ।

**डॉ. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**



# रक्षाबन्धनपर्वणः ऐतिहासिकमहत्त्वम् (पर्वविशेषः)

- डॉ विमलेश झा, गंगौली, सरिसबपाही, मधुबनी बिहार

भारतीयसंस्कृतिः विश्वस्य प्राचीनतमासु संस्कृतिषु अन्यतमा अस्ति। अस्याः संस्कृतेः वैशिष्ट्यं तु एतत् यत् अत्र जीवनस्य प्रत्येकः पक्षः परम्परया, इतिहासेन, धर्मेण, दर्शनशास्त्रेण, सामाजिकमूल्यैः च सम्बद्धः अस्ति। भारतीयाः पर्वोत्सवाः केवलं हर्षोल्लासस्य अवसराः न सन्ति, अपि तु ते समाजस्य ऐतिहासिक-स्मृतीनां, सांस्कृतिक- परम्पराणां, नैतिकमूल्यानां, धार्मिकविश्वासानां च संवाहकाः सन्ति। तेषु रक्षाबन्धनपर्वणः स्थानं विशेषरूपेण महत्त्वपूर्णम् अस्ति। रक्षाबन्धनं सामान्यतः भ्रातृभगिन्योः पवित्रसम्बन्धस्य पर्वरूपेण प्रसिद्धम् अस्ति। अस्मिन् दिने भगिनी भ्रातुः हस्ते रक्षासूत्रं बध्नाति तथा भ्राता तस्याः रक्षणस्य प्रतिज्ञां करोति। परन्तु अस्य पर्वणः इतिहासः केवलं आधुनिककाले विकसितः नास्ति। अस्य मूलभावना वैदिकपरम्परायां, पुराणेषु, महाभारते, मध्यकालीनभारतीयइतिहासे तथा आधुनिकभारते च विविधरूपेण दृश्यते। रक्षाबन्धनस्य ऐतिहासिकमहत्त्वं ज्ञातुं तस्य विकासक्रमस्य अध्ययनम् आवश्यकम् अस्ति। प्राचीनभारते रक्षासूत्रस्य धार्मिकप्रयोगः, राज्ञां तथा प्रजायाः सम्बन्धः, गुरुशिष्यपरम्परा, युद्धसमये रक्षाबन्धनस्य प्रतीकात्मकप्रयोगः, मध्ययुगे राजनैतिकसम्बन्धानां निर्माणे रक्षासूत्रस्य भूमिका, आधुनिककाले सामाजिकैकतायाः राष्ट्रवादस्य च संवर्धने अस्य पर्वणः योगदानम् एते सर्वे विषयाः रक्षाबन्धनस्य व्यापकं ऐतिहासिकस्वरूपं प्रकाशयन्ति। 'रक्षाबन्धनम्' इति नाम एव अस्य पर्वणः मूलभावं प्रकाशयति। रक्षासूत्रं बध्नाति इति रक्षाबन्धनम्। प्राचीनभारतीयसमाजे सूत्रबन्धनस्य परम्परा धार्मिकानुष्ठानेषु प्रचलिता आसीत्। यज्ञे, व्रते, पूजायां, संकल्पे च पवित्रसूत्रस्य प्रयोगः क्रियते स्म। तस्य उद्देश्यं केवलम् अलङ्कारः न, अपितु रक्षणस्य, संकल्पस्य, पवित्रतायाः च प्रतीकरूपेण तस्य उपयोगः आसीत्। वैदिकसाहित्ये 'रक्षा' अथवा 'रक्षासूत्र' सम्बन्धिताः मन्त्राः प्राप्यन्ते। यज्ञीयपरम्परायां आचार्यः अथवा पुरोहितः यजमानस्य हस्ते रक्षासूत्रं बध्नाति स्म। अस्य सूत्रस्य माध्यमेन आरोग्यस्य, आयुषः, कल्याणस्य, दुष्टशक्तिभ्यः संरक्षणस्य च कामना क्रियते स्म।अतः रक्षाबन्धनस्य मूलपरम्परा केवलं भ्रातृभगिनीसम्बन्धे सीमिता न आसीत्। तस्य प्रारम्भिकं स्वरूपं धार्मिकं, सामाजिकं रक्षणं च केन्द्रितम् आसीत्। वेदेषु मनुष्यस्य जीवनं ऋतस्य, धर्मस्य, यज्ञस्य, सामाजिककर्तव्यस्य च आधारेण व्यवस्थितम् आसीत्। रक्षणस्य भावना तत्र सर्वत्र दृश्यते। मनुष्यः देवताभ्यः रक्षणं याचते, देवताः च तस्य जीवनस्य, पशूनां, ग्रामस्य, राष्ट्रस्य च रक्षणकर्तारः इति भावः आसीत्।रक्षासूत्रं बध्नन् मनुष्यः स्वजीवनस्य सुरक्षायै शुभसंकल्पं करोति स्म। रक्षासूत्रस्य बन्धनं एकप्रकारस्य प्रतिज्ञारूपम् आसीत्। तेन व्यक्तिः धर्माचरणस्य, सदाचारस्य, आत्मसंयमस्य च स्मरणं करोति स्म।एतादृशे धार्मिकवातावरणे रक्षाबन्धनस्य भावनायाः विकासः अभवत्। कालान्तरे धार्मिकरक्षासूत्रस्य भावः पारिवारिकसम्बन्धेन सम्बद्धः अभवत्। एवं रक्षाबन्धनस्य वर्तमानस्वरूपं दीर्घकालीन-सांस्कृतिक- विकासस्य परिणामः अस्ति।

रक्षाबन्धनस्य प्राचीनपरम्परासु भविष्यपुराणस्य उल्लेखः विशेषतया क्रियते। तत्र रक्षाबन्धनसम्बद्धा धार्मिकपरम्परा वर्णिता अस्ति। इन्द्रस्य तथा शक्रस्य युद्धसमये रक्षासूत्रबन्धनस्य कथा प्रसिद्धा अस्ति। देवराजस्य इन्द्रस्य विजयाय तस्य पत्नी शची रक्षासूत्रं बबन्ध इति परम्परागतकथा अस्ति। कथामनुसृत्य देवासुरसङ्ग्रामे देवाः संकटग्रस्ताः आसन्। तदा शची इन्द्रस्य रक्षणाय पवित्रं सूत्रं मन्त्रैः संस्कृत्य तस्य हस्ते अबध्नात्। ततः इन्द्रः युद्धे विजयम् अवाप्तवान्। अस्याः कथायाः ऐतिहासिकतायां विद्वत्सु मतभेदाः सन्ति, किन्तु भारतीयपरम्परायां अस्याः कथायाः सांस्कृतिकं महत्त्वं निर्विवादम् अस्ति। अस्य कथानकस्य मूलसन्देशः अस्ति यत् रक्षासूत्रं विश्वासस्य, शुभकामनायाः, विजयस्य च प्रतीकम् अस्ति । अत्र रक्षाबन्धनं भ्रातृभगिनीसम्बन्धात् बहिः व्यापक-धार्मिकपरिप्रेक्ष्ये दृश्यते।हाभारतपरम्परायां श्रीकृष्णस्य द्रौपद्याः च सम्बन्धेन रक्षाबन्धनस्य कथा अत्यन्तं लोकप्रियाऽस्ति। एकदा श्रीकृष्णस्य अङ्गुल्यां क्षतिः अभवत्। तदा द्रौपदी स्ववस्त्रस्य अंशं विदार्य कृष्णस्य अङ्गुलीं बबन्ध। श्रीकृष्णः तस्याः स्नेहं स्मृत्वा तस्याः रक्षणस्य भावं प्रदर्शितवान् इति लोकपरम्परा अस्ति। महाभारतस्य मूलग्रन्थे आधुनिकरूपेण प्रचलितं रक्षाबन्धनपर्वणः वर्णनं नास्ति, अतः अस्य कथानकं लोकपरम्परया विकसितं मान्यते। मतथापि भारतीयसामाजिकस्मृतौ एषा कथा अत्यन्तं प्रभावशालिनी अस्ति।अस्याः कथायाः महत्त्वं भ्रातृभगिनीसम्बन्धस्य जैविकसीमां अतिक्रम्य आत्मीयसम्बन्धस्य प्रतिष्ठापनम् अस्ति। द्रौपदी कृष्णस्य भगिनीवत् पूज्या भवति तथा कृष्णः तस्याः रक्षणस्य उत्तरदायित्वं स्वीकृतवान् इति भावः भारतीयमानसस्य अङ्गम् अभवत्।कालक्रमेण रक्षाबन्धनस्य स्वरूपे परिवर्तनं जातम्। प्राचीनकाले धार्मिकरक्षासूत्रं प्रधानं आसीत्। मध्यकाले भ्रातृभगिन्योः सम्बन्धः अस्य पर्वणः केन्द्रे आगतः। ततः क्रमशः सामाजिक तथा राजनैतिक सम्बन्धेष्वपि रक्षासूत्रस्य प्रयोगः दृश्यते। राजपूतसमाजे रक्षाबन्धनस्य विशेषं महत्त्वम् आसीत्। राजपूतस्त्रियः वीरराजपूतानां तथा अन्येषां राजपुरुषाणां हस्ते रक्षासूत्रस्य बन्धनं कुर्वन्ति स्म। तेन माध्यमेन भ्रातृभावः, संरक्षणस्य वचनं, राजनीतिकविश्वासः च प्रकटितो भवति स्म।अत्र रक्षासूत्रं केवलं पारिवारिकं प्रतीकं नासीत्, अपितु सामाजिकसन्धेः चिह्नमपि अभवत्। रक्तसम्बन्धाभावेऽपि रक्षासूत्रबन्धनेन भ्रातृत्वस्य भावः स्थापितः भवति स्म।

मध्यकालीनभारते राजपूतानां समाजे वीरता, स्वाभिमानः, स्त्रीसम्मानः, कुलमर्यादा, धर्मरक्षा च प्रमुखानि मूल्यानि आसन्। अस्मिन् सामाजिक- वातावरणे रक्षाबन्धनं विशेषमहत्त्वं प्राप्तवान्। राजपूतस्त्री यदि कस्यचित् राज्ञः वा वीरस्य हस्ते रक्षासूत्रं प्रेषयति स्म, तर्हि तस्य अर्थः केवलं व्यक्तिगतः नासीत्। तत्र 'भ्राता भव', 'मम रक्षणं कुरु', 'मम सम्मानस्य रक्षणं कुरु' इत्यादयः भावाः निहिताः भवन्ति स्म।इतिहासग्रन्थेषु चित्तौडस्य महाराज्ञी कर्णावती- मुगलसम्राट् हुमायूँसम्बन्धी रक्षाबन्धनस्य कथा बहुधा उल्लिख्यते। लोकप्रचलितकथानुसारं कर्णावती हुमायूँ प्रति रक्षासूत्रं प्रेषितवती तथा तस्मात् साहाय्यस्य अपेक्षां कृतवती। हुमायूँ तस्याः रक्षासूत्रस्य सम्मानं कर्तुम् इष्टवान् इति कथा प्रसिद्धा अस्ति।किन्तु आधुनिकेतिहासकाराः अस्य प्रसङ्गस्य प्रमाणिकतां विषये सावधानतया विचारयन्ति। समकालीनप्राथमिकस्रोतैः अस्य कथायाः सर्वांशः निश्चिततया सिद्धः नास्ति। अतः एषा कथा इतिहासस्य प्रमाणितघटना इति न, अपि तु लोकस्मृतौ प्रतिष्ठितः सांस्कृतिकप्रसङ्गः इति वक्तुं उचितम्। तथापि अस्य कथायाः सांस्कृतिकमहत्त्वं महत् अस्ति, यतः सा रक्षाबन्धनस्य धार्मिकपर्वत्वात् राजनैतिकविश्वासस्य प्रतीकत्वं प्रति विकासं सूचयति। भारतीयसमाजे सम्बन्धस्य निर्माणं केवलं रक्तसम्बन्धेन न भवति। संस्कृतौ 'आत्मीयता' इति भावः अत्यन्तं व्यापको वर्तते। गुरुः पिता इव, अतिथिः देवतावत्, मित्रं बन्धुवत् च मन्यन्ते। रक्षाबन्धनस्य परम्परा अस्य व्यापकसम्बन्धबोधस्य उदाहरणम् अस्ति। यः व्यक्ति रक्षासूत्रं स्वीकरोति, सः रक्षाबन्धनस्य माध्यमेन नूतनं नैतिकसम्बन्धं स्वीकरोति। अतः रक्षाबन्धनं सामाजिक-विश्वासस्य निर्माणे महत्त्वपूर्णं साधनम् अभवत्। विशेषतः मध्ययुगे यदा राजनीतिकस्थितयः अस्थिराः आसन्, तदा परस्परविश्वासस्य, संरक्षणस्य, सहयोगस्य च महत्त्वं अधिकम् आसीत्। रक्षासूत्रं तादृशसम्बन्धानां प्रतीकात्मकं माध्यमं भवितुम् अर्हति स्म। रक्षाबन्धनदिने प्रातः स्नानं कृत्वा शुद्धवस्त्रधारणं, देवपूजनं, पितृतर्पणं, ब्राह्मणपूजनं, रक्षासूत्रबन्धनं च प्रचलितम् अस्ति। कतिपयप्रदेशेषु अस्य दिवसस्य सम्बन्धः उपाकर्मेण अपि अस्ति। वैदिकाध्ययनस्य पुनरारम्भः, यज्ञोपवीतपरिवर्तनम्

क्रमशः...१० पृष्ठे

इत्यादयः संस्काराः अस्मिन् काले प्रचलन्ति।

अतः रक्षाबन्धनं केवलं पारिवारिकपर्व न, अपितु धार्मिकसंस्कारैः सम्बद्धं व्यापकं पर्व अस्ति। तस्य ऐतिहासिकविकासे धार्मिकपरम्परायाः महत्त्वपूर्णं योगदानम् अस्ति। श्रावणपूर्णिमा वैदिक- विद्याध्ययन-परम्परायां विशेषं महत्त्वं वहति। ब्राह्मणसमुदायेषु तथा वैदिकपरम्परासु अस्मिन् दिने उपाकर्मसंस्कारः क्रियते। यज्ञोपवीतस्य परिवर्तनं, ऋषितर्पणं, वेदाध्ययनस्य पुनरारम्भः च अस्य प्रमुखानि अङ्गानि सन्ति। अस्मात् कारणात् श्रावणपूर्णिमा भारतीयशिक्षापरम्परायाः अपि प्रतीकत्वेन दृश्यते। रक्षाबन्धनस्य पर्वणि यदि रक्षासूत्रस्य रक्षणभावना अस्ति, तर्हि उपाकर्मे ज्ञानस्य, वेदस्य, संस्कृतेः च संरक्षणस्य भावना अस्ति। अतः श्रावणपूर्णिमा भारतीयजीवनस्य विभिन्नपरम्पराणां समन्वयस्य दिवसः अस्ति। आधुनिकभारते रक्षाबन्धनस्य स्वरूपे नूतनः आयामः विकसितः राष्ट्रियैकतायाः तथा सामाजिकसमरसतायाः। एकोनविंशतिशताब्द्याः अन्तिमे काले तथा विंशतिशताब्द्याः प्रारम्भे भारतीयसमाजे राष्ट्रीयचेतनायाः विकासः तीव्रः अभवत्। तस्मिन् समये भारतीयपर्वाणां सामाजिकैकतायै प्रयोगः अपि अभवत्।

रक्षाबन्धनस्य 'बन्धुत्व'भावना राष्ट्रभावनया सम्बद्धा अभवत्। भारतीयाः परस्परं रक्षासूत्रं बध्नन्तः जाति, भाषा, सम्प्रदाय, प्रदेश इत्यादीन् भेदान् अतिक्रम्य एकतायाः सन्देशं दातुं प्रयतन्ते स्म। एवं रक्षाबन्धनं परिवारात् राष्ट्रपर्यन्तं सम्बन्धस्य विस्तारस्य प्रतीकम् अभवत्। भारतीयस्वातन्त्र्यसङ्ग्रामस्य इतिहासे 1905 तमं वर्षं अत्यन्तं महत्त्वपूर्णम् अस्ति। तस्मिन् वर्षे ब्रिटिशशासनेन बंगालस्य विभाजनस्य निर्णयः कृतः। अस्य विरोधे स्वदेशीआन्दोलनस्य विकासः अभवत्। रवीन्द्रनाथठाकुरः बंगालस्य सामाजिक- एकतां प्रदर्शयितुं रक्षाबन्धनस्य भावनां प्रयोगरूपेण प्रस्तुतवान्। हिन्दू-मुस्लिमयोः परस्परं रक्षासूत्रबन्धनस्य माध्यमेन बन्धुत्वस्य, एकतायाः, बंगालस्य अखण्डतायाः च सन्देशः प्रसारितः जातः। अयं प्रसङ्गः रक्षाबन्धनस्य आधुनिकेतिहासे अत्यन्तं महत्त्वपूर्णः अस्ति। अत्र रक्षाबन्धनं पारिवारिकसम्बन्धस्य पर्वत्वात् सामाजिक-राजनैतिकैकतायाः प्रतीकत्वं प्राप्तवान्। अस्य माध्यमेन रक्षाबन्धनस्य मूलभावना- 'त्वं मम, अहं तव' राष्ट्रस्य नागरिकेषु विस्तारिता। जातीयद्वेषस्य स्थाने भ्रातृत्वस्य स्थापना अस्य आन्दोलनस्य प्रमुखः सन्देशः आसीत्। रवीन्द्रनाथठाकुरः भारतीयसंस्कृतेः गहनः अध्येता तथा मानवतावादी चिन्तकः आसीत्। तेन रक्षाबन्धनस्य भावनायाः प्रयोगः सामाजिकैकतायै कृतः। तस्य दृष्टौ भारतीयसमाजस्य वास्तविकशक्तिः परस्परविश्वासे तथा मानवीयैकतायां निहिता आसीत्। 1905 तमे वर्षे बंगालविभाजनस्य विरोधे रक्षाबन्धनस्य आयोजनं सामाजिकैकतायाः सशक्तं प्रतीकम् अभवत्। जनाः परस्परं रक्षासूत्रं बध्नन्तः एकतायाः प्रतिज्ञां कुर्वन्ति स्म। अस्य ऐतिहासिकप्रयोगस्य कारणेन रक्षाबन्धनस्य अर्थः अधिकव्यापकः अभवत्। इदं पर्व केवलं भ्राता- भगिन्योः न, अपि तु समाजस्य प्रत्येकं सदस्यस्य परस्पररक्षणस्य प्रतीकम् अपि अभवत्। स्वातन्त्र्यसङ्ग्रामकाले भारतीयनेतारः जनसामान्यं सांस्कृतिकप्रतीकैः सह सम्बध्नातुं प्रयतन्ते स्म। भारतीयपर्वाणि जनसमूहेषु एकताम्, आत्मविश्वासं, स्वदेशप्रेमं च जागरयितुं समर्थानि आसन्। रक्षाबन्धनस्य सन्देशः सरलः आसीत्- वयं सर्वे परस्परं बान्धवाः स्मः, अतः एकस्य संकटे सर्वेषां दायित्वम् अस्ति। एषा भावना औपनिवेशिक- शासनस्य 'विभज्य शासन' नीतेः विरुद्धं सामाजिकेकतायै प्रेरणां ददाति स्म। रक्षाबन्धनस्य सूत्रं तस्मिन् काले राष्ट्रियैकतायाः प्रतीकत्वेन अपि दृष्टं शक्यते। भारतस्य विविधेषु प्रदेशेषु रक्षाबन्धनं विभिन्ननामभिः, विभिन्नपरम्पराभिः च आचर्यते। उत्तरभारते सामान्यतः रक्षाबन्धनम् अथवा राखी इति नाम प्रचलितम्। महाराष्ट्रे 'नारळीपूर्णिमा' इति नाम्ना एषः दिवसः प्रसिद्धः। तत्र समुद्रस्य पूजनं तथा नारिकेलसमर्पणं प्रमुखम् अस्ति। गुजराते केषुचित् प्रदेशेषु 'पवित्रोपना' इति परम्परा दृश्यते। दक्षिणभारते श्रावणपूर्णिमायाः विविधधार्मिकरूपाणि सन्ति। नेपालदेशे अपि रक्षाबन्धनस्य विशिष्टा परम्परा अस्ति, यत्र 'जनैपूर्णिमा' इति नाम प्रचलितम्। एतेन ज्ञायते यत् पर्वणः बाह्यरूपं प्रदेशानुसारं परिवर्तते, किन्तु रक्षणस्य, पवित्रसम्बन्धस्य, मंगलकामनायाः च मूलभावः सर्वत्र विद्यमानः अस्ति। भारतीयग्रामेषु रक्षाबन्धनं दीर्घकालात् पारिवारिकसामाजिकसमागमयोः अवसरः अस्ति। विवाहिता भगिन्यः पितृगृहं गच्छन्ति, भ्रातरः तासां स्वागतं कुर्वन्ति, परिवारस्य सदस्याः एकत्रिताः भवन्ति। पूर्वकाले यातायातस्य साधनानि सीमितानि आसन्। तथापि भगिन्यः दूरप्रदेशेभ्यः अपि पितृगृहं आगच्छन्ति स्म। एषा परम्परा पारिवारिकसम्बन्धस्य दृढतां प्रकाशयति। ग्रामीणसमाजे पर्वाणि सामाजिकजीवनस्य प्रमुखकेन्द्राणि आसन्। रक्षाबन्धनम् अपि तादृशमेव अवसरं प्रददाति स्म, यत्र परिवारजनाः तथा समाजस्य सदस्याः परस्परं मिलन्ति स्म। पर्वणां सामाजिक-इतिहासे आर्थिकपक्षः अपि महत्त्वपूर्णः भवति। रक्षाबन्धनस्य अवसरः स्थानीयव्यापारस्य, हस्तशिल्पस्य, वस्त्रविक्रयस्य, मिष्टान्नव्यवसायस्य च वृद्धिं जनयति।

पूर्वकाले रक्षासूत्राणि गृह एव निर्मीयन्ते स्म। सूतस्य, मौलिकस्य, विविधवर्णतन्तूनां च प्रयोगः क्रियते स्म। कालान्तरे आपणव्यवस्थायाः विकासेन विविधप्रकाराणि रक्षासूत्राणि निर्मितानि। आधुनिककाले पर्यावरणानुकूलरक्षासूत्राणां, हस्तनिर्मितरक्षासूत्राणां, स्वदेशनिर्मितरक्षासूत्राणां च प्रचलनं दृश्यते। आधुनिककाले रक्षाबन्धनस्य स्वरूपे अनेकाः नवीनपरम्पराः समाविष्टाः अभवन्। भगिन्यः भ्रातृभ्यः रक्षासूत्रं बध्नन्ति, भ्रातरः उपहारं ददति। दूरस्थाः परिवारजनाः पत्रैः, दूरभाषेण, अन्तर्जालमाध्यमेन वा शुभकामनाः प्रेषयन्ति। यद्यपि जीवनशैली परिवर्तिता, तथापि पर्वणः मूलभावना अद्यापि जीविता अस्ति। आधुनिककाले अस्य पर्वणः क्षेत्रम् अपि विस्तारितम् अस्ति। सैनिकानां रक्षासूत्रबन्धनम्, वृक्षेषु रक्षासूत्रबन्धनम्, सामाजिकसेवाकार्यक्रमाः, अनाथबालकानां सह पर्वपालनम् इत्यादयः नूतनाः प्रयोगाः दृश्यन्ते। भारतस्य विविधप्रदेशेषु रक्षाबन्धनस्य अवसरः सैनिकानां सम्मानस्य अवसरः अपि भवति। भगिन्यः अथवा विद्यालयस्य छात्राः सैनिकानां हस्ते रक्षासूत्रं बध्नन्ति। तेन माध्यमेन सैनिकानां प्रति कृतज्ञता, सम्मानः, राष्ट्ररक्षणाय धन्यवादभावना च प्रकटिता भवति। अत्र 'भ्राता' इति शब्दस्य अर्थः व्यापकः भवति। सीमायां देशस्य रक्षणं कुर्वन् सैनिकः समस्तस्य राष्ट्रस्य भ्रातरः भवन्ति। अतः रक्षाबन्धनस्य ऐतिहासिकभावना राष्ट्ररक्षायाः भावनया सम्बद्धा वर्तते। आधुनिकसमाजे रक्षाबन्धनस्य नवीनः आयामः पर्यावरणरक्षणम् अस्ति। वृक्षेषु रक्षासूत्रं बद्ध्वा जनाः तेषां संरक्षणस्य संकल्पं कुर्वन्ति। नदीनां, पर्वतानां, वनानां, पशुपक्षिणां च संरक्षणस्य संदेशः अपि अस्मात् पर्वणः माध्यमेन प्रसारितुं शक्नोति।

इतिहासतः भारतीयसंस्कृतौ प्रकृतिः पूज्या आसीत्। नदी माता, पृथिवी माता, वृक्षाः देवतास्वरूपाः इति भावना आसीत्। अतः प्रकृतेः रक्षणं रक्षाबन्धनस्य मूलभावनया पूर्णतया सङ्गच्छते।रक्षाबन्धनं भारतीयसमाजे स्त्रीसम्मानस्य भावनां दृढीकर्तुं शक्नोति। भगिनी केवलं रक्षणीयव्यक्तिः न, अपि तु परिवारस्य संस्कारवाहिका, समाजस्य निर्मात्री, राष्ट्रस्य सक्रियसदस्या च अस्ति। इतिहासे राजपूतस्त्रियः, स्वतन्त्रतासङ्ग्रामस्य महिलाः, सामाजिक- कार्यकर्त्रियः च विविधरूपेण समाजजीवनं प्रभावितवन्तः। रक्षाबन्धनस्य माध्यमेन नारीणां सम्मानस्य, तासां सुरक्षायाः सामाजिकदायित्वस्य च स्मरणं भवति।

भारतीयसंस्कृतेः जीवितपरम्परायाः एषा विशेषता अस्ति यत् सा समयानुसारं बाह्यरूपं परिवर्तयति, किन्तु मूलमूल्यानि संरक्षति। रक्षाबन्धनम् अस्याः सांस्कृतिकजीवितशक्तेः उत्तमम् उदाहरणम् अस्ति। रक्षाबन्धनस्य इतिहासः अस्मान् शिक्षयति यत् परम्परा स्थिरा वस्तु नास्ति। सा समयानुसारं नूतनानि अर्थरूपाणि स्वीकरोति। प्रारम्भे रक्षासूत्रं धार्मिकरक्षणस्य प्रतीकम् आसीत्। ततः पारिवारिक-सम्बन्धस्य प्रतीकम् अभवत्। मध्ययुगे सामाजिकविश्वासस्य, संरक्षणस्य च माध्यमम् अभवत्। आधुनिककाले सामाजिकसमरसता, राष्ट्रैकता, पर्यावरणरक्षा, मानवतायाः च प्रतीकत्वं प्राप्तवान्। भविष्ये रक्षाबन्धनस्य स्वरूपम् अधिकं व्यापकं भवितुम् अर्हति। परिवारस्य रक्षणेन सह समाजस्य दुर्बलवर्गस्य रक्षणं, बालिकानां शिक्षायाः संरक्षणं, वृद्धानां सेवाः, पर्यावरणस्य रक्षा, जलसंरक्षणं, राष्ट्रसम्पत्तेः संरक्षणं, यान्त्रिकसुरक्षायाः जागरूकता च अस्य पर्वणः आधुनिकविस्ताररूपेण भवितुं शक्नुवन्ति।

रक्षाबन्धनस्य सूत्रं यदि केवलं हस्तपर्यन्तं सीमितं भवति, तर्हि तस्य अर्थः संकुचितः भवति। यदि तदेव सूत्रं सामाजिककर्तव्यस्य प्रतीकं भवति, तर्हि पर्वणः ऐतिहासिकपरम्परा आधुनिकजीवने पुनः सार्थकता प्राप्नोति। यद्यपि सर्वाः कथाः समानरूपेण ऐतिहासिकप्रमाणैः सिद्धाः न सन्ति, तथापि एताः भारतीयसांस्कृतिकस्मृतौ महत्त्वपूर्णं स्थानं धारयन्ति। इतिहासस्य दृष्ट्या प्रमाणितघटना तथा लोकपरम्परा इत्येतयोः भेदं ज्ञात्वा एव रक्षाबन्धनस्य सम्यक् अध्ययनं करणीयम्।रक्षाबन्धनं कालक्रमेण अनेकानि रूपाणि स्वीकृतवान्, किन्तु तस्य आत्मा न परिवर्तिता। सः आत्मा अस्ति- परस्परविश्वासः, रक्षणभावना, भ्रातृत्वम्, प्रेम, कर्तव्यं तथा सामाजिकएकता।

अतः रक्षाबन्धनं केवलं भगिन्या भ्रातुः हस्ते रक्षासूत्रबन्धनस्य उत्सवः नास्ति। इदं पर्व भारतस्य ऐतिहासिकस्मृतीनां, पारिवारिकमूल्यानां, सामाजिकसम्बन्धानां, सांस्कृतिकराष्ट्रियैकतायोः जीवितप्रतीकम् अस्ति।अस्य पर्वणः सारः एकस्मिन् वाक्ये एव कथयितुं शक्यते-

## "रक्षासूत्रं न केवलं हस्ते बध्यते"

यदा रक्षाबन्धनस्य ऐतिहासिकपरम्परा आधुनिककर्तव्येन सह संयुज्यते, तदा अस्य पर्वणः वास्तविकं महत्त्वं प्रकाशते। परिवारस्य रक्षणात् समाजस्य रक्षणं, समाजस्य रक्षणात् राष्ट्रस्य रक्षणं, राष्ट्रस्य रक्षणात् मानवतायाः रक्षणं च एष एव रक्षाबन्धनस्य ऐतिहासिकयात्रायाः व्यापकः सन्देशः वर्तते। अन्ते च-

येन बद्धो बली राजा, दानवेन्द्रो महाबलः।
तेन त्वामनुबध्नामि, रक्षे मा चल मा चल॥"

सर्वेभ्यः रक्षाबंधनपर्वणः अनन्ताः शुभकामनाः। इत्यलम्।।